change the whole thing so very thoroughly, may be left to the just-minded scholars to judge. There is no beautiful passage, no Alaṃkāra, no other metre but Anuṣṭubh, (there are only two instances of the Triṣṭubh metre in the whole story), and no dramatic interest. There is much repetition, e. g. the reference to Śakuntalā's peculiar birth and parentage, occurs five times; there is an unnecessary lecture on the duties of parents and husband by Śakuntalā to Duṣyanta. Last, but not the least, the character of Duṣyanta and Śakuntalā, as depicted by the Padm. is as different from that by Kālidāsa, as black is from white. The Duṣyanta of the Purāṇa is rude, lacking in manners, a matter of-fact man without courtesy to the sages even, not to speak of the fair sex. The Śakuntalā of the Purāṇa is less of a simple girl of hermitage and is quite businesslike in asking the king to promise to make her son, the heir-apparent to the throne. She is bolder than is fit for a lady, and has neither the simplicity and innocence of a sage's daughter nor the womanly grace and courtesy fitting her high birth. On the contrary, she extols her high birth. By reading the conversation between Śakuntalā and Duṣyanta of the Purāṇa, one would think them to be a couple of the meanest origin, abusing each other to their heart's content. But we find just the reverse in Kālidāsa; we cannot recognise them to be the same couple, we met with in the Purāṇa.

As to the Mbh, it is quite clear that there is much in common. Now, who is the borrower? If we say the Mbh, then why does the epic leave the account of the ring and the curse of the sage? Moreover, it is evident, that the story of Śakuntalā, as remarked by Dr. Winternitz, is an interpolation, but for the two verses—**भस्त्रा माता पितुः** etc. The perusal of southern Mss. also strengthens this view.

The story of Śakuntalā seems to have been known, of course not in the present form, in the time of the Brāhmaṇas, as it is referred to in the Śatapatha Brāhmaṇa. Then the

story was developed, and in the time of the old Mbh., contained the incident of Duṣyanta's deliberate insulting of Śakuntala. Then it fell into the hands of some rhapsodist, who added the didactic portion to the story. This was further increased in bulk by some still later editor, by adding lengthy descriptions of the hunt and the hermitage. The Padm. probably borrowed from the older recension the 108 verses, which are wholly didactic. Then the story was influenced by some old ballad, on which is based the Buddhistic legend, and from it, it derived the incident of the ring. The whole was then recast by the Padm. or by some other writer earlier than the Padm. Finally from the Padm. it was adopted and the present shape given to, by Kālidāsa.

---

3. THE RAGHUVAṂSA STORY.

Mr. Nandargirkar, in his invaluable edition of the Raghuvaṃs'a, after comparing Vālmīki with Kāli āsa, says :—

"And from the foregoing remarks, it is abundantly evident that the Raghuvaṃs'a of Kalidasa, is not the prototype of the Rāmāyaṇa. We find in the Raghuvaṃs'a several allusions to Vālmīki, but from these allusious we cannot infer that Raghuvaṃs'a is based on the Rāmāyaṇa or it is the prototype of that epic."

The origin of the story of Raghuvaṃs'a, was not known to any body. In the first place the genealogy itself, much less the incidents, is of a peculiar type. Out of the fourtee: Purā-

ṇas,* that give a list of the kings of the Solar race, there is only Brahmapurāṇa, which makes Dilīpa's son Raghu, Raghu's son Aja, Aja's son Das'aratha and his son Rāma.

As to the later kings only the Viṣṇu and the Vāyu Purāṇas agree to some extent with the Raghuvaṃs'a list.

Following is the comparative list of the later kings :—

	Raghuvaṃs'a.		Viṣṇu Purāṇa.		Vāyu Purāṇa.
1.	Kus'a.	1.	Kus'a	1.	Kus'a.
2.	Atithi	2.	Atithi	2.	Atithi.
3.	Niṣadha	3.	Niṣadha	3.	Niṣadha.
4.	Nala	4.	Nala	4.	Nala.
5.	Nabhas	5.	Nabhas	5.	Nabhas.
6.	Puṇḍarīka	6.	Puṇḍarīka.	6.	Puṇḍarīka
7.	Kṣemadhanvā	7.	Kṣemadhanvā	7.	Kṣemadhanvā
8.	Devānīka	8.	Devānīka	8.	Devānīka.
9.	Ahīnagu	9.	Ahīnagu	9.	Ahīnagu.
10.	Pāriyātra	10.	Pāriyātra	10.	Rūpa.
11.	Śīla	11.	Dala	11.	Ruru
12.	Unnābha	12.	Bala	12.	Pāriyātra.
13.	Vajranābha	13.	Auṅka	13.	Dala.
14.	Śaṅkhana	14.	Vajranābha	14.	Chala.
15.	Vyuṣitās'va	15.	Śaṅkhana	15.	Uktha.
16.	Vis'vasaha	16.	Dhyuṣitās'va	16.	Vajranābha
17.	Hiraṇyanābha	17.	Vis'vasaha.	17.	Śaṅkhanābha.
18.	Brahmiṣtha	18.	Hiraṇyanābha	18.	Vyutthitās'va.
19.	Putra	19.	Puṣya	19.	Vis'vasaha.
20.	Puṣya	20.	Dhruvasandhi	20.	Hiraṇyanābha.

* Kurma, XXI ; Śiva, (Dharmasaṃhitā) 61. 8 ; Brahma. VIII. ; Viṣṇu, IV. 4. ; Agni, 272. ; Matsya, XII ; Liṅga, I, 65 ; Vāyu, 88 ; Saura-upapurāṇa 30 ; Brahmāṇḍa iii, 63 to Viii, 214 ; Harivaṃs'a XI. 660 to XV. 832 ; Padma (Ānandās'rama) V. 8, 1320f. ; Garuḍa I. 138, 17 to 44. ; Bhāgavata IX., 6, 4 to 12, 9.

Raghuvaṃs'a.	Viṣṇu Purāṇa.	Vāyu Purāṇa
21. Dhruvasandhi	21. Sudars'ana.	21. Puṣya.
22. Sudars'ana.	22. Agnivarṇa	22. Dhruvasandhi
23. Agnivarṇa		23. Sudars'ana.
		24. Agnivarṇa.

Dr. Winternitz, in his History of Indian Literature, Vol I. p. 454, says that the story of the Pā'ālakhaṇḍa of the Bengali recension of the Padm. resembles the Raghuvaṃs'a story.

The following text of the Pātālakhaṇḍa, is based on the three Mss. noted down before. Its perusal will show how far it agrees with Kālidāsa's poem.

Following are the most striking verbal and other agreements between the two :—

Padm.	Raghuvaṃ's'am.
स्कन्धासक्तसमिद्गर्भैः प्रत्यायातैर्वनान्तरात् । शिष्यैः प्रपूर्यमाणं च सायं सन्ध्यार्थिभिर्द्रुतम् ॥ V.	वनान्तरादुपावृत्तैः समित्कुशफलाहरैः । पूर्यमाणमदृश्याग्नि- प्रत्युद्यातैस्तपस्विभिः ॥ I. 49.
तच्छ्रुत्वा वचनं तस्य चिरं दध्यौ तपोधनः । अथाम्बं बोधयामास सन्ततिस्तम्भकारणम् ॥ V.	सोऽपश्यत् प्रणिधानेन सन्ततेः स्तम्भकारणम् । भाविनात्मा भुवो भर्तुरथैनं प्रत्यबोधयत् ॥ I. 74.

Padm.	Raghuvaṃsam.
विलोकितः सुरभ्या त्वं कल्पतर्वङ्घ्रिसंस्थया ॥ V.	आसीत्कल्पतरुच्छाया- मास्थिता सुरभिः पथि । I. 75b.
नाम्नि कीर्तित एवासौ यदायाति सुमङ्गला । तत्सिद्धिं तव राजेन्द्र विद्धि हस्तगतामिव ॥ V.	अदूरवर्त्तिनीं सिद्धिं राजन् विगणयात्मनः । उपस्थितेयं कल्याणी नाम्नि कीर्तित एव यत् ॥ I. 87
पश्चात्त्वमनुगच्छेथा अनुतिष्ठेरपि स्थिताम् । निषण्णायां निषीदेथाः पिबन्त्यां च जलं पिबेः ॥ V.	प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः । निषण्णायां निषीदास्यां पीतामम्भसि पिबेरपः ॥ I. 89.
पोतवत्सां महाभाग दिलीपो धेनुमामुचत् । VI.	वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच । II. 1.
एवं निषेवमाणस्य तां धेनुं जगतीपतेः । व्यगमन् व्रतयुक्तस्य सभार्यस्येकविंशतिः । दिनानि सुतलाभाय दुःखेष्वपि सुखानि वै ॥ VI.	इत्थं व्रतं धारयतः प्रजार्थं समं महिष्या महनीयकीर्तेः । सप्त व्यतीयुस्त्रिगुणानि तस्य दिनानि दोनोद्धरणोचितस्य ॥ II. 25

Padm.

शस्त्रैरपि न यच्छक्य-
मकीर्त्यै धन्विनां न तत् ।
VI.

महीतलस्य राज्यं तु
वरमैन्द्रात्पदादपि ।
VI.

दिशः प्रसेदुः प्रववौ
चारुगन्धवहोऽनिलः ।
VII.

रघुस्तदङ्गनिष्यन्दि-
जलेन बलिनां वरः ।
चकार नयने धौते
ततोऽपश्यत्पुरन्दरम् ॥
VII.

राजपत्नी ततः काले
सुषुवेऽप्रतिमं सुतम् ।
ब्राह्मे मुहूर्ते धर्मज्ञ
तेन नाम्नाह्यजोऽभवत् ॥
IX.

मतङ्गस्य मुनेः शापाद्
गर्वादवमतस्य वै ।
नागत्वमगमं घोरं
त्वत्प्रसादेन मोचितः ॥
XI,

Raghuvaṃsam.

शस्त्रेण शक्यं यदशक्यरक्षं
न तद्यशः शस्त्रभृतां क्षिणोति ॥
II. 40b.

महीतलस्पर्शनमात्रभिन्न
मूर्जं हि राज्यं पदमैन्द्रमाहुः ॥
II. 50b

दिशः प्रसेदुर्मरुतो ववुः सुखाः
III. 14a.

तदङ्गनिष्यन्दजलेन लोचने
प्रमृज्य पुण्येन पुरस्कृतः सताम् ॥
III. 41a.

ब्राह्मे मुहूर्ते किल तस्य देवी
कुमारकल्पं सुषुवे कुमारम् ।
अतः पिता ब्रह्मण एव नाम्ना
तमात्मजन्मानमजं चकार ॥
V. 36

मतङ्गशापादवलेपमूला-
दवाप्तवानस्मि मतङ्गजत्वम् ।
V. 53a.

Padm.

हिपा हिपैरसज्यन्त
रथाश्च रथिभिः सह ।
हयारोहैर्हयारोहाः
पादाताश्च पदातिभिः ॥
X.

अथ रोधसि पाथोधे-
र्दक्षिणे कृतकेतनम् ।
गोकर्णं तु महादेव-
मुपवीणयितुं मुनिः ।
नारदो व्योममार्गेण
जगाम भरतर्षभ ॥
XI.

यदि प्राणहरा चेयं
माला मन्दारपुष्पजा ।
न प्राणान् हरते
कस्मादर्पिता मम वक्षसि ॥
XI.

तताम्धस्य मुनेः पुत्रो
वैश्यस्य तोयकांक्षिणः ।
पूरयामास सलिलं
कुम्भे नादोऽभवत्तदा ॥
हिरदस्येव शुश्राव
करे पूरयतो जलम् ।
निनदन्तं दशरथस्ततो
बाणं मुमोच ह ॥
शब्दपाती स बाणस्तु
मुनिपुत्रस्य वक्षसि ।
XIV.

Raghuvamsam.

पत्तिः पदातिं रथिनं रथेश-
स्तुरङ्गसादी तुरगाधिरूढम् ।
यन्ता गजस्थोऽभ्यपतद्गजस्थं
तुल्यप्रतिद्वन्द्वि बभूव युद्धम् ॥

अथ रोधसि दक्षिणोदधेः
स्थितगोकर्णनिकेतमीश्वरम् ।
उपवीणयितुं ययौ रवे-
रुदगाद्वृत्तिपथेन नारदः ॥
VIII. 33

स्वगियं यदि जीवितापहा
हृदये किं निहिता न हन्ति माम्
विषमप्यमृतं क्वचिद्भवे-
दमृतं वा विषमीश्वरेच्छया ॥
VII. 46.

कुम्भपूरणभवः पटुरुच्चै
रुच्चचार निनदोऽभसि तस्याः ॥
तच्च स हिरदहृतहितशङ्को
शब्दपातिनमिषुं विससर्ज ॥
IX. 73

Padm.	Raghuvaṃs´am,
राज्यं प्रशासतस्तस्य महीक्षस्य महामते । वर्षाणामयुतं प्रायात् किञ्चिदूनं सुतार्थिनः XIV.	पृथिवीं शासतस्तस्य पाकशासनतेजसः । किञ्चिदूनमनूनर्द्धेः शरदामयुतं ययौ ॥ X. 1
व्रीडया परयाविष्टा ययुः केचित् स्थिता अपि । बालाविमौ तदिलोक्य कठोरं किं करिष्यतः ॥ XIV.	क्षेपिता हि बहवो नरेश्वरा- स्तेन तात धनुषा धनुर्भृतः । ज्यानिघातकठिनत्वचो भुजान् स्वान्विधूय धिगिति प्रतस्थिरे ॥ XI. 20.

The above list should not, in any case, be considered exhaustive. To give all verbal and other agreements, will be quite beyond the limit of this book.

Before forming any opinion as to who is the borrower—Kālidāsa or the Padm. it would be better to examine the points of difference between the two.

In the Raghuvaṃs´a, we find a very lengthy description of the ramblings of Dilīpa in the forest with the cow ; but it is not so in the Padm.

In the Raghuvaṃs´a, Nandinī asks the king to drink milk but the latter says that he will do so, after the sage has taken milk for his sacrifice and the calf has drunk ; In the Padm. it is Nandinī who tells him that he should take milk after the sage has taken and the calf has drunk.

Kālidāsa describes the prēgnant condition of Sudakṣiṇā and the early boyhood and education of Raghu, at great length ; it is not so in the Padm.

In the Padm., Indra, while stealing the horse of Raghu, is again and again warned by the charioteer—**मा कार्षीः साहसं रघौ** whereas in the Raghuvaṃs'a, the charioteer is engaged in quieting the horse.

Though the Padm. makes a mention of the Digvijaya of Raghu, still, in it we find neither the names of the countries, towns and kings that Raghu conquered, nor the course which he took ; Kālidāsa on the other hand, devotes about three-fourths of his canto IV to it and gives a descriptive list of the kings and countries which Raghu subjugated.

The Vis'vajit sacrifice, is described at length by the Padm., but Kālidāsa dismisses it in two verses only.

The story of Kautsa is given by the Puraṇa before he meets Raghu ; but Kālidāsa makes Kautsa relate it to Raghu.

In the Raghuvaṃs'a, the lion Kumbhodara, is the friend of Nikumbha ; in the Padm., there is no mention of the friend.

In the Purāṇa, we find that the anger of the preceptor of Kautsa is mentioned twice ; and when Raghu thinks of marching against Kubera, the latter is informed of the whole matter by Nārada. Kubera, is at a loss then and asks Nārada to tell him some way of escape, as it was impossible to fight with Raghu, who could bear the thunder-bolt of Indra even. In the Raghuvaṃs'a, there is only one mention of the anger of Kautsa's preceptor and there is no mention of Nārada at all.

In the Padm., Raghu asks Kautsa to stay for one day only ; in Kālidāsa for two or three days.

Again, in the Raghuvaṃs'a, Raghu offers the entire heap of gold to Kautsa, who unwillingly accepts it ; in the Padm., Kautsa takes his teacher's fees only.

In the Padm., Aja receives his education from Kautsa ; in the Raghuvaṃs`a, there is no mention of it.

In the Padm., Aja encamps on the banks of the Narmadā, where he with his army is entertained by the neighbouring king named Dyumat ; it is absent in the Raghuvaṃs´a.

The name of the missile given by the Gandharva to Aja is Prasvāpana according to the Purāṇa ; Kālidāsa, on the other hand, calls it Sammohana.

The beautiful verses sung by the bards to awaken Aja in the Raghuvaṃs´a are not to be found in the Padm.

In the Raghuvaṃs´a, Indumatī is accompanied by her friend Sunandā in the Svayaṃvara hall, and the latter describes all the princes assembled there. Moreover these princes have amorous gestures, which Kālidāsa takes delight in describing. In the Padm., the princess is accompanied by the minister who points out the princes, but there is neither the mention of the names of princes nor of their qualifications, nor are there any amorous gestures.

The most important as well as beautiful verses in the Raghuvaṃs´a is—

सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा ।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ॥

VI, 67,

Dr. Winternitz in his History of Indian Literature, Vol. III, P. 60. mentions that Kālidāsa is called Dīpas´ikha-Kālidāsa by the Pandits, because of this verse. (Peterson, O. C. VI, Leiden 1883, III, 2, 339f.) ; in the same way, Māgha is also called

Ghaṇṭa Māgha because of his verse IV. 20, wherein he compares the mountain having the sun and the moon on eithre side, to an elephant on either side of whom are hanging two great bells. But no where in the Padm., do we find any reference to the term Dīpaśikhā.

The verses VII. 5 15., which are found in the Kumārasambhava also, and which describe the condition of the women of the city at the occasion of the procession of Aja's marriage procession, are not to be found in the Padm.

The sorrowful bewailings of Aja, at the death of his wife which form one of the finest portions of Kālidāsa's composition and to which the poet dovotes no less than twentysix verses (VIII. 44-69), are dismissed by the Purāṇa author in six verses only (XI. 25-30).

In the Purāṇa, Daśaratha hearing of his mother's death comes at once to the forest and later performs all the funeral rites; in the Raghuvaṃśa, the funeral is performed by the relatives and there is no mention of Dāśaratha coming.

In the Padm., we find that the disciple of Vasiṣṭha who comes to console Aja, after the death of his wife, is named Sutapā; Kālidāsa gives no name.

In the IX canto of the Raghuvaṃśa, we find that the poet devotes, not less than twenty-five verses to the pleasures of Daśaratha in the spring season, and about twenty verses to his hunting, These things are not at all referred to by the Purāṇa author, but we find instead the story of Śanaiścara and the adventures of Daśaratha in the starry world.

The Purāṇa dovotes the 13th chapter to the legend of Ṛṣyarṣṅga, which is totally absent in Kālidāsa (cf. Lüders—The Sage Ṛṣyaśṛṅga; Journal of Scientific Society, Göttingen 1897).

The Padm. describes the early childhood of Rāma and when he was five years old, he played with the flower-bows and flower-arrows, shooting at deer; in the meantime there comes

a demon disguised as a deer to kill Rāma. A shot from his flower-bow makes him lifeless. We do not find this story in the Raghuvaṃsa.

The two lores which Viśvāmitra teaches Rāma and Lakṣmaṇa when he takes them to the forest, are Balā and Atibalā according to Kālidāsa, and Jayā and Vijayā according to the Padm.

In the Purāṇa, the liberation of Ahalyā takes place, before Rāma and Lakṣmaṇa reach the hermitage of Viśvāmitra ; in the Rāghuvaṃśa, after they leave the hermitage for the capital of the Videhas.

The above mentioned facts clearly point out that inspite of many verbal and other striking resemblances, the difference between the Raghuvaṃśa and the Purāṇa is of no small importance. In my opinion, Kālidāsa is indebted to the Padmapurāṇa for his story.

If the Purāṇa were based upon the Raghuvaṃsa, then it was impossible for the author of the former to leave aside so marked and beautiful ideas,found in the latter. There are many useless, redundant and cumbrous descriptions, which Kālidāsa left because they would have marred the beauty of his poetry. No one attempts creating ugliness out of beautful, but reverse is the case. Granted that beautiful is some times defaced by an ugly imitator or copyist but the essence of beauty can never be wholly destroyed. The most ordinary and insipid thoughts of the Purāṇa, when they get the touch of refinement from the great poet, become quite another thing. For instanoe, compare the verse—

सा माला पतिता तस्या इन्दुमत्या उरःस्थले ।
ततस्तन्वो पपातोर्व्यां जह्नौ प्राणानपि क्षणात् ॥

How ordinary and dry statement of facts—that garland fell on the bosom of Indumatī the slender-waisted lady fell on

the ground, breathed her last in a moment. Now let us see what Kālidāsa says :—

क्षणमात्रसखीं सुजातयोः स्तनयोस्तामवलोक्य विह्वला ।
निमिमील नरोत्तमप्रिया हृतचन्द्रा तमसेव कौमुदी ॥

The garland fell on the bosom of Indumatī, she for a moment observed it and became restless ; then the beloved of the king closed, like the moon-light, when the moon is enveloped in darkness.

How beautifully does the flame of the lamp of life die away ! Or I leave it to the Sahrdayas to appreciate and judge for themselves. If any one were to copy or imitate the above stanza of Kālidāsa, is it possible for him not to bring unconciously any idea from it, to his own composition ? Such instances are numerous. It seems that Kālidāsa has breathed life into the lifeless structure of the Purāṇa.

Moreover, the prayer to Śanaiścara, the legend of Vibhāṇḍaka, the killing of a deer-demon by a flower-arrow by Rāma and such other things, which are Pauranic by their very nature have been left out by Kālidāsa in his great poem. The Purāṇa has only sixteen Triṣṭubh verses out of about seven-hundred verses (VII. 32—40, X. 1—3, and XVI. 24—27). These Triṣtnbh verses also are devoid of poetic figures, not to speak of the mass of Anuṣṭubh verses.

Kālidāsa changed the name of the missile, which the Gandharva gave to Aja, from Prasvāpana to Sammohana, for the latter is more poetic. But he could not perhaps wipe out of his memory the name Prasvāpana and so he uses this very name, though not as a proper name.

As we come to the same conclusion in the cases of both—Śakuntalā and Raghuvaṃśa—,it strengthens our argumentation for the priority of the Padmapurāṇa. Therefore, we may safely conclude that Kālidāsa studied the Padmapurāṇa and used it as a source for both of his works.

It would be better perhaps to understand the term *Source* The remarks of Mr. Verity in his introduction to Shakes-peares,

Henry V (1900 Edn), on the source of Shakespeare will not be out of place. He says :—

"Now, while it is proper always to recognise Shakespeare's obligations where they exist we must be careful not to over-estimate them. The word 'source' or 'original' will mislead us, unless we ask ourselves what constitutes the greatness of his plays, and consider how little that greatness is due to any nominal sources : how such qualities as characterisation (ever the crown of the dramatist's art) humour and wit, poetry and pathos and tragic intensity, deft manipulation of plot and underplot and varied relief, are Shakespeare's own gift and never the inspiration of another.

Dr. Furners remarks—

"When after reading one of his (Shakespeare's) tragedies, we turn to what we are pleased to call the 'original of his plot' I am reminded of those glittering gems, of which Heine speaks, that we see at night in lovely gardens, and think must have been left there by king's children at play, but when we look these jewels by day, we see only wretched little worms which crawl painfully away, and which the foot forbears to crush only out of strange pity' ".

Viśvabhāratī
Śāntiniketan
15. 9. 23.

H. Śarmā.

पद्मपुराणम् ।

—:०:—

सूत उवाच—

शेषभाषितमाकर्ण्य तथा भूगोलवर्णनम् ।
पिता मे पुनराप्रच्छत् प्रणतो बादरायणम् ॥ १ ॥

रोमहर्षण उवाच—

स निशम्य तु भूगोलं मुनिर्वात्स्यायनः पुनः ।
किमप्रच्छत् शेषनागं तज्ज्ञवान् वक्तुमर्हति ॥ २ ॥

व्यास उवाच—

भुवो मानं निशम्याथ कृताञ्जलिपुटो 1 मुनिः ।
भूधरंदेवमाप्रच्छत् नत्वा वात्स्यायनः पुनः ॥ ३ ॥

वात्स्यायन उवाच—

श्रुतं मे भगवन् भूमेः संस्थानं वर्णितं त्वया ।
दिवो मण्डलमानं च श्रोतु मिच्छामि भूधर ॥ ४ ॥
नक्षत्राणि ग्रहांश्चैव संस्थानं चन्द्रसूर्ययोः ।
ज्योतिषां च तथान्येषां श्रोतुमिच्छामि विस्तरम् ॥ ५ ॥
ये लोकाः स्वर्गसंस्थाश्च नभःसंस्थाश्च 2 ये प्रभो ।
संस्थानं परिमाणं च ब्रूहि तेषां महीधर ॥ ६ ॥
ये यस्मिन् कृतवासा हि 3 देवगन्धर्वकिन्नराः ।
तत्सर्वं विस्तरेणैव शेष ब्रूहि कृपान्वितः ॥ ७ ॥

---

1. B and S कृतांज्ञ निपुणो । 2. A and C • संज्ञाश्च । 3. C •श्च ।

व्यास उवाच—

इति तत्प्रश्नमाकर्ण्य सर्पाणामधिपो हसन् ।
मुनिं प्राह महातेजा विष्णुशक्तिं परां स्मरन् ॥ ८ ॥
विष्णोरेतद्विराड्रूपं ब्रह्माण्डमिति 4 कथ्यते ।
तस्य विज्ञानमात्रेण मुक्तो भवति मानवः ॥ ९ ॥
अत्रेतिहासं वक्ष्यामि शृणु वात्स्यायन द्विज ।
संवादं विष्णुदूतेन राजर्षेर्भरतस्य च ॥ १० ॥
विश्वामित्रसुतायां यो जातायां मेनकोदरात् ।
दुष्यन्ता 4a ज्जनुरापेदे महाभागवतो नृपः ॥ ११ ॥
स चकार क्रतून्सर्वानश्वमेधादिकान् नृपः ।
नाकृतस्तेन यज्ञोऽस्ति न धर्मस्तदसेवितः ।
नाप्राप्यस्तस्यलोकेषु कोऽपि स्वर्गादिकेष्वपि ॥ १२ ॥
भगवानपि गोविन्दस्तपसा परितोषितः ।
यत्प्रज्ञा भारतो वंशस्त्रिषु लोकेषु विश्रुतः ॥ १३ ॥

वात्स्यायन उवाच—

स्मारितोऽयं महाप्रश्नस्तव वाक्येन भूधर ।
चिरं यो मनसा ध्यातः संशयं जनयेन्मम ॥ १४ ॥
विश्वामित्रसुता देव मेनकायामभूत्कथम् ।
दुष्यन्तेन कथं लब्धा सा कन्या वरवर्णिनी ॥ १५ ॥
भरतोऽभूत्सुतो यस्याः 5 सर्वधर्मविशारदः ।
येनायं भारतो वंशः ख्यापितः पृथिवीतले ।
तत्सर्वं विस्तरेणैव भगवान्ब्रूहि साम्प्रतम् ॥ १६ ॥

शेष उवाच—

दुष्यन्तो नाम राजर्षिश्चन्द्रवंशविभूषणः ।
पौरवः सुमहातेजा वेदवेदाङ्गपारगः ॥ १७ ॥

---

4. A and C ब्रह्माण्डं विप्र । 4a. C always reads दुष्यन्त । 5. B and C यस्य ।

धनुर्विद्यासु निपुणः सर्वराजगुणान्वितः ।
कन्दर्प इव सौन्दर्ये धैर्ये च तुहिनाचलः ॥ १८ ॥
समुद्र इव गम्भीरः 6 कुबेर इव ऋद्धिमान् 7 ।
प्रतापे वासवसमस्तेजस्वी भानुमानिव ॥ १९ ॥
सत्सु स्निग्धो यथा चन्द्रो धर्मतन्त्रे यथा मनुः ।
स प्रजाः 8 पालयामास नृपः पुत्रानिवौरसान् ॥ २० ॥
कदाचिन्मृगयां राजा स जगाम बलैर्वृतः ।
रम्यं स्यन्दनमारुह्य नानामणिगणाचितम् ॥ २१ ॥
अथा 9 रण्ये ददर्शासौ मृगमत्यन्तमूर्जितम् ।
तमन्वधावद्राजर्षिर्मृगमात्तशरासनः ॥ २२ ॥
मृगोऽपि बलवांस्तस्मिन्नुत्प्लवेन महीयसा 10 ।
धावत्येव ततो राजा बद्धामर्षोऽनुधावति ॥ २३ ॥
ततः कण्वाश्रमाभ्यासे मृगं प्रति महाबलः ।
सन्दधे शरमत्युग्रं शब्दभेदिनमाशुवै ॥ २४ ॥
तं तथा संहितशरं कण्वशिष्याः सुदूरतः ।
अब्रुवन्नाश्रममृगो न हन्तव्यो महीपते !! २५ ॥
तदाश्रममृगेत्येवं कर्णाद्वैमागते स्वरे 11 ।
संजहार महाबाणं पौरवः पौरुषान्वितः ॥ २६ ॥
प्रत्याख्यातसमुद्योगस्तृषार्त्तः स महीपतिः ।
तोयमन्वेषयन् कन्या ददर्शाप्सरसां समाः ॥ २७ ॥
स्वानुरूपघटैः कक्षविन्यस्तैः सरसः पयः ।
आकृष्य सिञ्चतीर्बाला वन्यानाश्रमपादपान् ॥ २८ ॥
तासां मध्येऽतिरम्याङ्गी कन्या नाम्ना शकुन्तला ।
राजानां प्रेक्ष्य सुस्निग्धमुवाच वचनं द्विज ॥ २९ ॥

---

6. B and S गाम्भीरः । 7. B and S बुद्धिमान् । 8. B C and S प्रजा ।
9. B and S तथा० । 10. S महायशाः । 11. S शरे ।

त्वमद्यातिथिरायातः सत्कृतो यास्यसि ध्रुवम् ।
इदमासनमेतत्ते पाद्यमर्घ्यं च गृह्यताम् ॥ ३० ॥
तद्भागकृतसन्तुष्टो गृहीत्वातिथिसत्क्रियाम् ।
मदनाशुगसम्पातकिञ्चित्क्षुब्ध मनोरथः ॥ ३१ ॥
उवाच राजा दुष्यन्तः कासि[12] कस्यासि[13] भामिनि ।
पश्यामि त्वां वरारोहे देवीमिव दिवश्च्युताम् ॥ ३२ ॥
राजन्योऽहं पुरुकुले दुष्यन्तो नाम भूपतिः ।
तच्छ्रुत्वा सा सखीं प्राह कथयस्व[14] ममोद्भवम् ॥ ३३ ॥

सख्युवाच—

राजन्यो गाधितनयो विश्वामित्रो महामनाः ।
वशिष्ठेन जितो युद्धे ब्रह्मण्येन[15] बलीयसा ॥ ३४ ॥
गर्हयन् क्षत्रियबलं ब्रह्मण्यं बहु मानयन् ।
ब्रह्मण्यार्थी तपस्तेपे बहुवर्षसहस्रकम् ॥ ३५ ॥
तद्दृष्ट्वा भयमापन्नः शक्रः संमन्त्र्य दैवतैः ।
मेनकां प्रेषयामास तपो विघ्नाय पार्थिव ॥ ३६ ॥
सागत्य पुरतस्तस्य स्वर्गाभरणभूषिता ।
प्रलोभयामास मुनिं विश्वामित्रं स्वविभ्रमैः[16] ॥ ३७ ॥
जितेन्द्रियोऽपि कामेन तदपाङ्गधनुश्च्युतैः ।
कटाक्षबाणै राजेन्द्र विव्यधे गाधिनन्दनः ॥ ३८ ॥
धैर्यच्युतोऽथ बाहुभ्यामाश्लिषन्मेनकां[17] मुहुः ।
रेमे च मदनाविष्टः क्षणात्संग्रामवाप सः ।
व्रीडितस्तां विसृज्याथ वनेऽस्मिन्प्रययौ द्रुतम् ॥ ३९ ॥
मेनकापि च तं गर्भं विसृज्य गहने वने ।
शक्रलोकं समापेदे न प्रैक्षत पुनर्नृप ॥ ४० ॥

---

12. A क्वासि । 13. S कन्यासि । 14. A and C कथयत्वं । 15. S ब्राह्मण्येन । 16. C and S. सविभ्रमैः । 17. C °श्लिषन्मेनकां ।

शकुन्तेरथ गर्भोऽसौ ररक्षे पृथिवीपतेः ।
अतः शकुन्तला नाम नृपेयं वरवर्णिनी 18 ॥ ४१ ॥
कण्वस्तु सुमहातेजाः कन्यां वीक्ष्य वने स्थिताम् ।
अनुकम्प्य स्वसुतात्वे कल्पयामास सुन्दरीम् ॥ ४२ ॥
मुनिना संभृता कन्या तं तातं मन्यते सदा ।
सुतां कण्वस्य विद्धीमां मुनिवर्यस्य भूपते ॥ ४३ ॥

दुष्यन्त उवाच—

सुव्यक्तं राजपुत्रीयं यथा कल्याणि भाषसे ।
अन्यथा पौरवाणां हि मनो नैवानुरज्यति ॥ ४४ ॥
भार्या भवतु सुश्रोणी ममेयं मृगलोचना ।
सुवर्णमालां वासांसि कुण्डले परिहाटके ॥ ४५ ॥
नानापत्तनजे शुभ्रे मणिरत्ने च शोभने ।
आहरामि महाभागे निष्काद्दीन्यतुलानि च ॥ ४६ ॥
सर्वं राज्यं प्रदास्यामि भार्या भवतु ते 19 सखी ।
गान्धर्व्वेण च मां भीरु 20 विवाहेन वृणीतु च ।
विवाहानां हि रम्भोरु गान्धर्व्वः श्रेष्ठ उच्यते ॥ ४७ ॥

शकुन्तलोवाच—

फलाहारो 21 गतो राजन् पिता मे दूत आश्रमात् ।
मुहूर्त्तं तु प्रतीक्षस्व स मां तुभ्यं प्रदास्यति ॥ ४८ ॥

राजोवाच—

इच्छामि त्वां वरारोहे भजमानामनिन्दिते 22 ।
त्वदर्थं मां स्थितं विद्धि त्वद्गतं हि मनो मम ॥ ४९ ॥

---

18. A B and S वरवर्त्तिनी । 19. A and C मे । 20. S वीर (Is it a part of the compound वीरविवाहेन ?) 21. S फलाहार० । 22. C ०मनिन्दिताम् ।

आत्मनो बन्धुरात्मैव गतिरात्मैव चात्मनः ।
आत्मनैवात्मनो दानं कर्तुमर्हसि सुव्रते ॥ ५० ॥
अष्टावेव महाभागे विवाहा वेदसम्मताः ।
ब्राह्मो दैवस्तथार्षश्च प्राजापत्यस्तथासुरः ॥ ५१ ॥
गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमः स्मृतः ।
मनुः स्वायम्भुवो धर्मान् पूर्वपूर्वान् पुराब्रवीत् ॥ ५२ ॥
प्रशस्तांश्चतुरः पूर्वान् ब्राह्मणस्योपधारय ।
षडानुपूर्व्या क्षत्राणां विद्धि धर्म्यानानिन्दिते 23 ॥ ५३ ॥
राज्ञान्तु राक्षसोऽप्युक्तो विट्शूद्रस्यासुरः स्मृतः ।
पञ्चानां तु त्रयो धर्म्या 24 द्वावधर्म्यौस्मृताविह ॥ ५४ ॥
पैशाचश्चासुरश्चैव न कर्तव्यौ 25 कदाचन ।
गान्धर्वराक्षसौ क्षत्रे धर्म्यौ 26 तौ मा विशङ्किथाः ।
मिश्रौ वापि पृथग्वापि कर्तव्यौ हौ 27 महीभुजाम् ॥ ५५ ॥
सा त्वं मम सकामस्य सकामा वरवर्णिनी ।
गान्धर्वेणैव धर्मेण भार्या भवितुमर्हसि ॥ ५६ ॥

शकुन्तलोवाच—

यदि धर्मपथस्त्वेष यदि चात्मा प्रभुर्मम ।
प्रदाने पौरवश्रेष्ठ शृणु मे समयं प्रभो ।
प्रतिजानीहि सत्यं मे यथा वक्ष्यामि तेऽनघ ॥ ५७ ॥
मम जायेत यः पुत्रः स भवेत्त्वदनन्तरः 28 ।
युवराजो महाराज सत्यमेतद्ब्रवीमि ते 29 ॥ ५८ ॥
अभिज्ञानञ्च राजेन्द्र देहि स्वमङ्गुरीयकम् ।
यद्येतदेवं राजेन्द्र अस्तु मे सङ्गमस्त्वया ॥ ५९ ॥

---

23. A धर्म्यानां नन्दिते ; B and S धर्मानानिन्दिते । 24. Emendation. A धर्म्ये ; B C and S धर्मा । 25. A and S कर्तव्यः । 26. S क्षत्रधर्म्यौ ; A and C क्षत्रे धर्म्यौ । 27. C तौ । 28. S ०क्षदनन्तरः । 29. C omits 58b.

शेष उवाच—

एवमस्त्विति तां राजा प्रत्युवाचाविचारयन् ।
अयि च 30 त्वां हि नेष्यामि नगरं स्वं शुचिस्मिते ॥ ६० ॥
तथा त्वमर्हा सुश्रोणि सत्यमेतद्ब्रवीमि ते ।
एवमुक्ता स राजर्षिस्तामनिन्दितविग्रहाम् ॥ ६१ ॥
जग्राह विधिवत्पाणावुवास च तया सह ।
विश्वास्य चैनां स प्रायादब्रवीच्च पुनः पुनः ॥ ६२ ॥
प्रेषयिष्ये च नेतुं त्वां वाहिनीं मन्त्रिभिः सह ।
विभूत्या परयोपेतां नाययिष्यामि सुव्रते ॥ ६३ ॥
इति तस्याः प्रतिज्ञाय स नृपो मुनिसत्तम ।
मनसा चिन्तयन् प्रायात् दत्त्वा चाप्यङ्गुरीयकम् ॥ ६४ ॥
काश्यपस्तपसा युक्तः श्रुत्वा किं नु करिष्यति ।
एवं विचिन्तयन्नेव प्राविशन्नगरं नृपः ॥ ६५ ॥

इति श्रीपद्मपुराणे स्वर्गखण्डे शाकु31न्तलोपाख्याने प्रथमोऽध्यायः ॥

---

30. A त्वयीतस्त्वां । 31. A and C. शकुन्तलो० ।

II

शेष उवाच—

एतस्मिन्नन्तरे विप्र कण्वोऽप्याश्रममाश्रयत् [1] ।
शकुन्तला तु पितरं क्रिया नोपजगाम तम् ॥ १ ॥
विज्ञायाथ च तां कण्वो दिव्यज्ञानेन भारिष ।
उवाच भगवान् प्रीतो व्रीडमानां शकुन्तलाम् ॥ २ ॥
त्वयाद्य भद्रे रहसि मामनाभाष्य यः कृतः ।
पुंसा सह समायोगो न स[2] धर्मोपघातकः [3]॥ ३ ॥
क्षत्रियस्य हि गान्धर्वो विवाहः श्रेष्ठ उच्यते ।
सकामायां सकामस्य निर्मन्त्रो रहसि स्मृतः ॥ ४ ॥
महात्मासौ महाराजः पुरुवंश प्रदीपनः ।
यं पतिं प्रतिपन्ना त्वं भजमानं शकुन्तले ॥ ५ ॥
ममापि चिन्ता हृद्यासीत्त्वत्प्रदानाय सुन्दरि ।
ययाहं नियतं दग्धो दावेनेव महाद्रुमः ॥ ६ ॥
वरं त्वत्सदृशं लोके नान्यमालोकयामि ते ।
तेनायं निश्चितो राजा मयापि सदृशो वरः ॥ ७ ॥
स यदि स्वयमागत्य त्वामगर्ह्यात्करे नृपः ।
अभ्यर्थनार्थलघुता न ममाभूद्गरीयसी ॥ ८ ॥
महात्मा भविता पुत्रस्तव सुभ्रु महाबलः ।
य इमां भोक्ष्यते कृत्स्नां भूमिं सागरमेखलाम् ॥ ९ ॥
स्वनाम्ना ख्यातिमप्यत्र वंशे संजनयिष्यति ।
परं चाभिगतस्यास्य चक्रं नाम महात्मनः [4] ।
भविष्यत्यप्रतिहतं नियतं चक्रवर्त्तिनः ॥ १० ॥

---

1. A and B ० माश्रमत् । 2. S नासौ । 3. C धर्मोपघातकः । 4. B महात्मभिः ।

शेष उवाच—

ततः प्रक्षाल्य पादौ सा सन्निधाय फलानि च ।
उपविष्टं गतश्रान्तिमब्रवीत्तं शुचिस्मिता ॥ ११ ॥
यो मयासौ हृतो राजा पौरवः पुरुषोत्तमः ।
स त्वयानुमतो यस्मात्कृतार्थास्मि पितः प्रभो ।
प्रसादं कुरु तस्यापि सामात्यस्य महीपतेः ॥ १२ ॥

कण्व उवाच 5—

प्रसन्न एव तस्याहं पूर्वमेव शुचिस्मिते !
ब्रह्मण्यः पौरवो राजा धर्मात्मा च विशेषतः ।
कं ददामि वरं तस्मै ब्रूहि कल्याणि माचिरम् ॥ १३ ॥

शेष उवाच6—

ततो धर्मिष्ठतां वव्रे राज्याच्चास्खलनं तथा ।
शकुन्तला पौरवाणां दुष्यन्तहितकाम्यया ॥ १४ ॥
परेऽहनि मुनौ याते विरहेण शकुन्तला ।
न लेभे मनसः शान्तिं चिन्तयन्ती महीपतिम् ॥ १५ ॥
क्षणं निश्वासबहुला सुष्वाप धरणीतले ।
लिलेख च नखेन क्ष्मां नाललाप सखीजनैः ॥ १६ ॥
क्षणं विलोकयामास दिगन्तान् लोललोचना ।
ध्यायन्ती जगतीनाथं क्षणं प्राप्तमनोरथा ।
आस्ते स्म धरणोपृष्ठे ध्याननिमितलोचना ॥ १७ ॥
एतस्मिन्नन्तरे विप्र दुर्वासास्तपसा ज्वलन् !
आजगामाश्रमपदं कण्वस्य द्विजसत्तम ॥ १८ ॥
दूरादुच्चैर्बभाषेऽथ केयं पर्णीटजे स्थिता ।
विलोकयतु मां प्राप्तमतिथिं भोजनार्थिनम् ॥ १९ ॥

---

5. B and S omit कण्वउवाच । 6. B C and S omit शेष उवाच ।

इत्युच्चैर्मुहुराभाष्य न प्राप्यातिथि सत्क्रियाम् ।
तपोधनश्चुकोपाशु शशाप क्रोधनो मुनिः ॥ २० ॥
यं त्वं चिन्तयसे बाले मनसानन्यवृत्तिना ।
विस्मरिष्यति स त्वां वै अतिथौ मौनशालिनीम् ॥ २१ ॥
इत्येवमुक्ते वचने क्रोधाद्दुर्व्वाससा तदा ।
सखी प्रियंवदा नाम शुश्राव क्रोधभाषितम् ॥ २२ ॥
त्वरयाथ समागम्य पाद्यादिकृतसत्क्रिया ।
प्रसादयामास मुनिं मूर्ध्ना तच्चरणं गता ॥ २३ ॥

प्रियंवदोवाच—

पौरवस्य इयं राज्ञो दुष्यन्तस्य महीभृतः ।
विश्वामित्रात्मजा बाला मेनकाप्सरसः सुता ॥ २४ ॥
कण्वस्य दुहिता चेयं पालनात्सुपतिव्रता ।
चिन्तयन्ती पतिं मुग्धा विरहेण सुविह्वला ॥ २५ ॥
न किञ्चिदभिजानाति न भवांस्तेन सत्कृतः ।
नावज्ञानान्न गर्वाच्च तद्भवान् क्षन्तुमर्हति ॥ २६ ॥
यया न विस्मरेद्राजा शापान्तं कुरु तापस ।
ततः प्रसन्नो दुर्वासाः प्राह शापान्तकारणम् ॥ २७ ॥
विस्मृतिस्तस्य राजर्षेस्तावदेव भविष्यति ।
प्रियंवदे नृपो यावदभिज्ञानं न पश्यति ॥ २८ ॥
इति श्रुत्वा स शापान्तं गृहीत्वा सत्क्रियां ययौ ।
अथ तस्यास्तदा गर्भो राजर्षेस्तेजसा भृतः ॥ २८ ॥
शशीव विशदे पक्षे वर्द्धते स्म दिने दिने ।
कण्वोऽपि भगवान् दृष्ट्वा दोहदं समुपस्थितम् ॥ ३० ॥
मुदा परमया युक्तः पृष्ट्वाभिलषितं हितम् ।
सम्भावयति वन्यानि मूलानि च 7 फलानि च ॥ ३१ ॥

---

7. A मृणालानि ।

अथ तां सप्तमे मासि गर्भे स्फूर्तिमुपेयुषि ।
उवाच भगवान् कण्वो मुनिमण्डलमध्यगाम् ॥ ३३ ॥
कन्या पितृगृहे नैव सुचिरं वासमर्हति ।
लोकापवादः सुमहान् जायते पितृवेश्मनि ॥ ३३ ॥
नार्याः पतिर्गतिर्भर्त्ता तपश्च परमं पतिः ।
दैवतं गुरुरार्यश्च 8 पतिः स्त्रीणां परं पदम् ॥ ३४ ॥
यं प्रसोष्यसि देवि त्वं भविता स महाबलः ।
राजपुत्रो वने स्थास्यत्ययं नाप्युचितो विधिः ॥ ३५ ॥
अतस्त्वां प्रेषयिष्यामि निकटं तस्य भूभृतः ।
पत्युः प्रेमा हि नारीणां परं सौभाग्यमुच्यते ॥ ३६ ॥

शकुन्तलोवाच

पितस्तेऽनुगृहीतास्मि पतिदर्शनवार्त्तया ।
नानुज्ञां प्रार्थये तुभ्यं स्नेहभङ्गभयात्तव ॥ ३७ ॥
न जाने की मया गर्भे धृतोऽयं पुरुषोत्तमः 9 ।
यत्तेजसा न शक्नोमि स्थातुमेकत्र मारिष ॥ ३८ ॥
तदद्यैव गमिष्यामि राजर्षेस्तस्य चान्तिकम् ।
अनुज्ञां देहि मे तात कृपया तापसोत्तम 10 ॥ ३९ ॥
तच्छ्रुत्वा भगवान् कण्वः स्नेहप्रस्नवविप्लुतः ।
अनुज्ञाप्य मुनीनन्यान्मुनिपत्नीश्च सुव्रताः ॥ ४० ॥
उवाच परया प्रीत्या प्रेषयामि शकुन्तलाम् ।
भर्तुर्गृहाय कल्याण्याः 11 कल्याणं कुरुत ध्रुवम् ॥ ४१ ॥
ताश्च वाक्यं मुनेः श्रुत्वा प्रेमाश्रुक्लिन्नलोचनाः ।
आशीर्भिरनुकूलाभिः प्रायुञ्जन्त शकुन्तलाम् ॥ ४२ ॥

---

8. B गुरु+र्यौंच (च illegible) ; A गुरुवर्यौंच ; Cand S गुरुरार्यश्च ।
9. C धृती गर्भे ममार्यं पुरुषोत्तमः । 10. B and S पूरुषोत्तम ; C तापसोत्तमः ।
11. A and C कल्याण्याः ।

विचित्रैरप्याभरणैः केशबन्धादिभिस्तथा ।
गात्रोद्वर्तनसंमार्ष्टिहरिद्रातैलसङ्गतैः ॥
भूषयामासुरव्यग्रां मुनिपत्न्यः शकुन्तलाम् ॥ ४३ ॥
शुशुभे सा महाभागा विश्वामित्रसुता सती ।
नितरां गर्भिणीबाला चन्द्रलेखेव विच्युता ॥ ४४ ॥
अथ गुल्मलताहृच्चान् हरिणान् हरिणाङ्गनाः ।
उवाच कण्वः प्रेमार्द्रो मुच्चन्नश्रुकला 12 मुहुः ॥ ४५ ॥
युष्माकं परमप्रेम्णा वासितेयं सुता मम ।
सर्वे कुरुत कल्याणं सुखं यातु शकुन्तला ॥ ४६ ॥
इति सर्वाननुज्ञाप्य कण्वो मतिमतां वरः ।
आहूय गौतमीं वृद्धां सखीं चास्याः प्रियंवदाम् । 13
उवाच श्लक्ष्णया वाचा शिष्यौ चापि महाव्रतौ ॥ ४७ ॥
यात 14 यूयं महीभर्तुर्दुष्यन्तस्य पुरं प्रति ।
इमां शकुन्तलां राज्ञि समर्प्य पुनरेष्यथ ॥ ४८ ॥
इति तस्य वचः श्रुत्वा गौतमी च प्रियंवदा ।
मुनिः सङ्गिवरः 15 शिष्यस्तथा शारद्वतो मुनिः ॥ ४९ ॥
तथेति प्रतिगृह्याथ मुनेराज्ञां स्वमूर्धसु ।
शकुन्तलां पुरस्कृत्य पन्थानं प्रतिपेदिरे ॥ ५० ॥
अथ दक्षिणतस्तस्याः शिवा घोरं ववाशिरे ।
मृगाश्च चेलुः सव्येन वाता वान्तिस्म धूषराः ॥ ५१ ॥
तदालोक्य समुद्विग्ना पथि यान्ती शकुन्तला ।
नितम्बिनी गर्भसत्त्वा न शेके चलितुं द्रुतम् ॥ ५२ ॥
अथ मध्याह्नसमये प्राप्य प्राचीं सरस्वतीम् ।
मुनेः शिष्यौ च मध्याह्नक्रियां चक्रतुरेव तौ ॥ ५३ ॥

---

12. Read ०श्रुकणान् ? 13. B प्रियंवदा। 14. A B and S यातु।
15. S शार्ङ्गरवः।

प्रियंवदा गौतमी च सलिलं तज्जगाहतुः ।
शकुन्तलापि तत्रैव स्नानार्थमुपचक्रमे ॥ ५४ ॥
प्रियंवदा करे न्यस्य अभिज्ञानाङ्गुरीयकम् ।
स्नातुं सरस्वतीतोयमगाहत सुलोचना ॥ ५५ ॥
प्रियंवदा नु तद्गृह्य वसनाञ्चलमध्यतः ।
यावन्न्यस्तवती तावत् पपात सलिले द्विज ॥ ५६ ॥
प्रियंवदा भिया तस्थे वृत्तान्तं न न्यवेदयत् ।
शकुन्तलापि तत्सख्यै पप्रच्छापि न विस्मृता ॥ ५७ ॥
ततः स्नात्वा च ते सर्वे समाप्य विधिवत्क्रियाम् ।
दुष्यन्तपुरमापेदुस्तास्त्रियस्तौ च तापसौ ॥ ५८ ॥
॥ इति श्रीपद्मपुराणे स्वर्गखण्डे शकुन्तलोपाख्याने 16
द्वितीयोऽध्यायः 17 ॥

---

16. A शकुन्तलोपाख्याने स्वर्गखण्डे ।

17. The first eleven verses of the next Chapter are also in cluded in the II Chapter by S.

III

शेषउवाच—

राजद्वारं समासाद्य कण्वशिष्यौ महामते ।
ऊचतुस्तौ प्रतीहारं तूष्णीं राज्ञे निवेदय ॥ १ ॥
काश्यपस्य निदेशेन राजद्वारमिहागतौ ।
शिष्यौ तस्य सङ्गिवर 1 शारङ्गतसमाह्वयौ ॥ २ ॥
सुता तस्य च कल्याणी द्वे अन्ये च द्विजस्त्रियौ ।
प्रतीहारस्ततो गत्वा राज्ञे सर्वं न्यवेदयत् ॥ ३ ।
राजा पुरोधसं प्राह गौतमं हृदि चिन्तयन् ।
कथमेतौ मुनेः शिष्यौ स्त्रीभिरेताभिरावृतौ ॥ ४ ॥
आगताविह संप्राप्तौ भवानेव हि पृच्छतु ।
किं कण्वस्याश्रमे कश्चिद्राक्षसः कुरुतेऽनयम् ॥ ५ ॥
न जानाति हि दुष्टात्मा दुष्यन्तं राक्षसान्तकम् ।
किं वने पशवस्त्यक्ता नियमं मुनिना कृतम् ॥ ६ ॥
बाधन्ते व्याघ्रसिंहाद्याः2स्त्रियो बालान् जरायुतान् ।
मृगयापि मया तावन्न कृता पुरवासिना ॥ ७ ॥
किं वा वन्यफलान्यद्य प्रभवन्ति न कानने ।
तेनाहारविनाभावाद्दुःखितास्ते तपोधनाः ॥ ८ ॥
यदद्य पतितं घोरं मुनीनां दुःखकारणम् ।
विधुनोमि तदद्यैव याहि पृच्छ तपोधनौ ॥ ९ ॥
पाद्यादीनि पुरस्कृत्य 3 विधायातिथिसत्क्रियाम् ।
वासयस्व मुनो विप्र स्वगृहे ता: 4 स्त्रियस्तथा ॥ १० ॥
चेद्विशेषविवक्षापि तयोरस्ति विबुध्य तत् ।
विज्ञापयिष्यसि पुनस्तद्विचार्य करोम्यहम् ॥ ११ ॥

---

1. S शार्ङ्गं ; C· शङ्गिवर । 2. Emendation for सिंहाद्या।
3. A B and C पुरस्कृत्वा । 4. Emendation for ता ।

शेषउवाच—

इति तद्वाक्यमादाय पुरोधाः स तपोधनः ।
पाद्यादीनि पुरस्कृत्य द्वारमागतवान् द्विज ॥ १२ ॥
राज्ञोक्तं सर्वमाचष्टे ददर्श च शकुन्तलाम् ।
अन्तःसत्त्वां महाभागां शिरः प्रच्छाद्य वाससा ॥
अधोमुखीं चन्द्रकलामिव दोषिमतीं पुरः ॥ १३ ॥
पप्रच्छ च मुनौ केयं सुन्दरी जगदद्भुता ।
अन्तःसत्त्वेव कल्याणी लज्जयाधोमुखी स्थिता ॥ १४ ॥

शिष्यावूचतुः—

विश्वामित्रसुता चेयं मेनकागर्भसंभवा ।
कण्वेन पालिता राज्ञो दुष्यन्तस्य महीपतेः ॥ १५ ॥
सेयं संप्रेषिता ब्रह्मन् कण्वेन नृपमन्दिरम् ।
अस्यैव भूपतेस्तेजो बिभ्रती मृगलोचना ॥ १६ ॥
राज्ञे निवेदयत्वद्य 5 तद्भवांस्त्वरया द्विज ।
नेयं राज्ञो द्वारदेशे स्थातुमर्हा महीपतेः ॥ १७ ॥

शेषउवाच—

पुरोधास्तदुपाकर्ण्य संभ्रमेण महीपतिम् ।
गत्वा निवेदयामास वृत्तान्तं मुनिभाषितम् ॥ १८ ॥
दुष्यन्तस्तदुपश्रुत्य विस्मृतिं परमां गतः ।
उवाच ब्राह्मणं ब्रह्मन् वचसा कटुना नृपः ॥ १९ ॥
नैवं स्मरतिमच्चेतः कुत्र का मे विवाहिता ।
गणिका कापि विप्रेन्द्रच्छलेन समुपागता ॥ २० ॥

गौतम उवाच—

न तथा दृश्यते राजन्नन्तःसत्त्वा वरानना 6 ।
अनुजानीहि राजेन्द्र त्वदन्तिकमुपानये ॥ २१ ॥

---

5. S ०त्वद्यै ; A ०वेद्य । 6. A वराङ्गना ।

विलोकय परं रूपं यदि ते स्मृतिरुज्ज्वेत् ।
प्रवेशनीया शुद्धान्ते नारी श्रीरिव रूपिणी ।
स्थातुमर्हा न च द्वारि द्योतयन्ती दिशश्त्विषा ॥ २२ ॥
यदि नापि स्मृतिस्ते स्यात् तद्रूपं तु तथापि ते ।
विलोक्य भविता नान्यरूपदर्शनलालसा ॥ २३ ॥
इति राज्ञानुनीतेनाभ्यनुज्ञातो द्विजोत्तमः ।
आनाययामास मुनौ ताः स्त्रियश्च 7 सुलक्षणाः ॥ २४ ॥
आशाभिरनुयोज्याथ कण्वशिष्यौ महामती ।
ऊचतुः कण्वसन्देशं निषण्णौ जगतीपतिम् ॥ २५ ॥

शिष्यावूचतुः—

त्वामाशिषा वर्द्धयित्वा प्राह त्वामावयोर्गुरुः ।
तच्छृणुष्व महाराजानन्तरं कर्तु[8]मर्हसि ॥ २६ ॥
दुहितेयं शकुन्तला नाम विश्वामित्रसुतानघ ।
मेनकासङ्गमा[9]ज्जाता पालिता दुहिता मम ॥ २७ ॥
मृगयाचारिणारण्ये गान्धर्वेण महीपते ।
विधिना यद्गृहीताभून्ममानुज्ञां विनापि हि ॥ २८ ॥
तत्साध्विति तं मन्ये क्षत्रियाणामयं विधिः 10 ।
तव सा बिभ्रती तेजो वस्तुं नार्हीटजे मम ॥ २९ ॥
महिषी राजराजस्य साक्षात् श्रीरिवरूपिणी ।
सेयं प्रगृह्यतां राजन् कल्याणी महिषी तव ॥ ३० ॥
जनयिष्यति यं पुत्रमियं राज्ञी शकुन्तला ।
चक्रवर्ती राजराजो महात्मा स भविष्यति ॥ ३१ ॥

---

7. Emendation. A तान्त्रियश्च ; B C and S तास्त्रियश्च ।
8. S. वर्तुं । 9. A ०सङ्गतां । 10. चतुर्धर्मोऽयं किल ।

इत्याशिषा नियुज्य त्वां गुरुराह महातपाः ।
इयं प्रियंवदा नाम सखी चास्या 11 मुनेः सुता ॥ ३२ ॥
इयं च ब्राह्मनी हृद्या राजन् गौतमवंशजा ।
राजन् वयमिहायाता अनया गुरुवाक्यतः ॥ ३३ ॥

राजोवाच—

कति सन्तीह गणिका भ्रमन्ति कामसेवया ।
राजराजस्य महिषी का नो भवितुमिच्छति ॥ ३४ ॥
ब्राह्मणा विविधाः सन्ति तापसाश्चाप्सरूपिणः ।
तासामनुग्रहेणैव समं ताभिर्भ्रमन्ति च 12 ।
भुञ्जते विपुलान् भोगान् गणिकाभिरुपार्जितान् ॥ ३५ ॥
निशम्य नृपतेर्वाक्यं शिष्यौ कण्वस्य तापसौ ।
शेषतुर्विरहेणास्याः पश्चात्तापमवाप्स्यसि ॥ ३६ ॥
इत्युक्ता तौ गतौ हृद्यौ तापसौ ब्रह्मवादिनौ ।
गौतमस्तौ प्रसाद्याथावासयत् स्वे च वेश्मनि ॥ ३७ ॥
अथ सा गौतमी हृद्या 13 जगाद जगतीपतिम् ।
नैवमर्हसि भो राजन् विश्वामित्रसुतां प्रति ॥ ३८ ॥
एवं लावण्यमापन्ना क्व दृष्टा गणिका त्वया ।
अन्तःसत्त्वा महाभागा त्वया राजन् विवर्जिता ॥ ३९ ॥
समाहितेन मनसा स्मर पश्य च सुन्दरीम् ।
इत्युक्ता मोचयामास शिरश्चादनमम्बरम् ॥ ४० ॥

राजोवाच—

पौरवाणां कुले जाताः सतां मार्गे कृतासनाः ।
न वयं रूपमात्रेण गणिकानां भ्रमामहे ॥ ४१ ॥
एवं वदति भूपाले व्रीडितेव तपस्विनी ।
निःसंख्येन च दुःखेन तस्थौ स्थूणेव निश्चला ॥ ४२ ॥

---

11. A चास्य 12. C हि 13. A विद्वा

संरम्भामर्षताम्राक्षी स्फुरमाणौष्ठसम्पुटा ।
कटाक्षैर्निर्दहन्तीव तिर्यग्राजानमैक्षत ॥ ४३ ॥
आकारं गूहमाना च मन्युनातिसमीरितम् ।
तपसा संभृतं तेजो धारयामास वै तदा ॥ ४४ ॥
सा मुहूर्तमिव ध्यात्वा दुःखामर्षसमन्विता 14 ।
भर्त्तारमभिसंप्रेक्ष्य क्रुद्धा राजानमब्रवीत् ॥ ४५ ॥
कथं न स्मरसे राजन् मृगयामधिगच्छता ।
गान्धर्वेण गृहीतो यत्पाणिर्मे 15 विधिना नृप ॥ ४६ ॥
इति श्रुत्वा तु वचनं शापेनास्तमितस्मृतिः ।
अब्रवीन्न स्मरामि त्वां कस्य त्वं दुष्टतापसि ॥ ४७ ॥
धर्म्मकामार्थसम्बन्धं न स्मरामि त्वयासह ।
गच्छ वा तिष्ठ वा कामं यद्वापीच्छसि तत्कुरु ॥ ४८ ॥

शकुन्तलोवाच—

कुतः प्रियंवदे साध्वि अभिज्ञानमिहानय ।
धूर्त्तमेनं सभामध्ये क्षेपयामि नराधिपम् ॥ ४९ ॥
इत्युक्त्वा पाणिमाक्षिप्य भूयो भूयः प्रियंवदाम् ।
उवाच देहि देहीति क्षेपयामि नराधिपम् ॥ ५० ॥
प्रियंवदा तु नीचैस्तां जगाद मृगलोचनाम् ।
कर्णान्तिके समासाद्य पतितं ते तदम्भसि ॥ ५१ ॥
तदुपश्रुत्य कल्याणी रम्भेव मरुता हता ।
पपात भूमौ निश्चेष्टा हा हताऽस्मीति वादिनी ॥ ५२ ॥
अथ तां गौतमी दृष्ट्वा बाहुभ्यां मृगलोचनाम् ।
आश्लिष्य सान्त्वयामास लेभे संज्ञां ततः पुनः ॥ ५३ ॥

---

14. C omits 45a. 15., C गृहीतोऽयं पाणिर्मे ।

अथ क्रुद्धा महाभागा सख्ये राज्ञे च भामिनी । 16
उवाचाभूणि सम्भार्य स्मरन्ती पितरं मुनिम् ॥ ५४ ॥
जानन्नपि महाराज कस्मादेवं प्रभाषसे ।
न जानामीति निश्शङ्कं यथान्यः प्राकृतो जनः ॥ ५५ ॥
अत्र ते हृदयं वेद सत्यस्यैवानृतस्य वा ।
कल्याणं 17 वद साध्वेण मात्मानमवमन्यथाः ॥ ५६ ॥
यो ऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते ।
किं तेन न कृतं पापं चौरेणात्मापहारिणा ॥ ५७ ॥
एकोऽहमस्मीति च मन्यसे त्वं, न हृच्छयं वेत्सि मुनिं पुराणम् ।
यो वेदिता कर्मणः पापकस्य, यस्यान्तिके त्वं ह्रजिनं करोषि ॥ ५८ ॥
मन्यते पातकं कृत्वा न कश्चिदेत्ति मामिति । 18
विदन्ति चैनं देवाश्च स्वस्यैवान्तरपूरुषः ॥ ५९ ॥
आदित्यचन्द्रावनिलोऽनलश्च, द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये, धर्मोऽपि जानाति नरस्य वृत्तम् ॥६०॥
यमो 19 वैवस्वतस्तस्य निर्यातयति दुष्कृतम् ।
हृदि स्थितः कर्मसाक्षी क्षेत्रज्ञो यस्य तुष्यति ॥ ६१ ॥
न तु तुष्यति यस्यैष 20 पुरुषस्य दुरात्मनः ।
तं यमः पापकर्माणं निर्यातयति दुष्कृतम् ॥ ६२ ॥
योऽवमन्यात्मनात्मानमन्यथा प्रतिपद्यते ।
न तस्य देवाः श्रेयांसो यस्यात्मापि न कारणम् ॥ ६३ ॥
स्वयं प्राप्तेति मामेवं मावमंस्थाः पतिव्रताम् ।
अर्च्यार्हां नार्चयसि मां स्वयं भार्यामुपस्थिताम् ॥ ६४ ॥
किमर्थं मां प्राकृतवदुपप्रेक्षसि संसदि ।
न खल्वरण्ये रुदितमसु मे शृणु भाषितम् ॥ ६५ ॥

---

16. C omits 53 and 54a. 17. A B and S कल्पनं। 18. C कश्चिदेत्ति न मामिति। 19. C यमो। 20. A B and S यस्यैव।

यदि मे याचमानाया वचनं न करिष्यसि ।
कबन्धापेन्न ते मूर्धा शतधैव फलिष्यति ॥ ६६ ॥
भार्यां पतिः समाविश्य यज्जायेत नराधिप ।
जायायास्तद्धि जायात्वं पौराणाः 21 कवयो विदुः ॥ ६७ ॥
यदागमवतः पुंसस्तदपत्यं प्रजायते ।
तत्तारयति सन्तत्या पूर्वप्रेतान् पितामहान् ॥ ६८ ॥
पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः ।
तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा ॥ ६९ ॥
मुनिनाभिहिता चाहं तव पुत्रो भविष्यति ।
राजराजश्चक्रवर्ती न तन्मिथ्या भविष्यति ॥ ७० ॥
सा भार्या या गृहे दक्षा सा भार्या या प्रजावती ।
सा भार्या या पतिप्राणा सा भार्या या पतिव्रता ॥ ७१ ॥
अर्द्धं भार्या मनुष्यस्य भार्या श्रेष्ठतमः सखा ।
भार्या मूलं त्रिवर्गस्य भार्या मूलञ्च सन्ततेः 22 ॥ ७२ ॥
भार्यावन्तः क्रियावन्तः सभार्या गृहमेधिनः ।
भार्यावन्तः प्रमोदन्ते भार्यावन्तः श्रियान्विताः ॥ ७३ ॥
सखायः प्रविविक्तेषु भवन्त्येताः प्रियंवदाः ।
पितरो धर्मकार्येषु भवन्त्यार्तस्य 23 मातरः ॥ ७४ ॥
कान्तारेष्वपि विश्रामो जनस्याध्वनिकस्य वै ।
यः सदारः स विश्रान्त24स्तस्माद्दाराः परा गतिः ॥ ७५ ॥
संसरन्तमभिप्रेतं 25 विषमेष्वन26पातिनम् ।
भार्यैवान्वेति भर्त्तारं सन्ततं या पतिव्रता ॥ ७६ ॥
प्रथमं संस्थिता 27 भार्या पतिं प्रेत्य समीक्षते ।
पूर्वं मृतं च भर्त्तारं पश्चात् साध्वनुगच्छति ॥ ७७ ॥

---

21. A पुराणाः । 22. C omits 72b. 23. C भवन्त्यार्तेषु ।
24. A °दारः परिश्रान्तः । 25. Emendation for °मपि प्रेतं ।
26. A B and S. विषमेष्वेक । 27. S संस्थिता ।

एतस्मात्कारणाद्भूप पाणिग्रहणमिष्यते ।
यदाप्नोति पतिर्भार्यामिहलोके परत्र च ॥ ७८ ॥
आत्मात्मनैव जनितः पुत्र इत्युच्यते बुधैः ।
तस्माद्भार्यां नरः पश्येन्मातृवत्पुत्रमातरम् ॥ ७९ ॥
भार्यायां जनितं पुत्रमादर्शे ष्विव चाननम् ।
ह्लादते जनिता प्रेक्ष्य स्वर्गं प्राप्येव पुण्यकृत् ॥ ८० ॥
दह्यमाना मनो दुःखैर्व्याधिभिश्चातुरा 28 नराः ।
ह्लादन्ते स्त्रेषु दारेषु घर्मार्त्ताः सलिलेष्विव ॥ ८१ ॥
सुसंरब्धोऽपि रामाणां न कुर्यादप्रियं नरः ।
रतिं प्रीतिं च धर्मं च तास्वायत्तमवेक्ष्य हि ॥ ८२ ॥
आत्मनो जन्मनः क्षेत्रं पुण्यं रामाः सनातनम् ।
ऋषीणामपि का शक्तिः स्रष्टुं रामामृते प्रजाः ॥ ८३ ॥
परिपत्य यथा सूनुर्धरणीरेणुगुण्ठितः 29 ।
पितुराश्लिष्यतेऽङ्गानि किमस्त्यभ्यधिकं ततः ॥ ८४ ॥
वरं प्रसूय पुत्रं ते विधाय च सुखं तव ।
गमिष्यामि महाराज कण्वस्य पितुराश्रमम् ॥ ८५ ॥
अण्डानि बिभ्रति स्वानि न भिन्दन्ति पिपीलिकाः ।
न भरेथाः कथं नु 30 त्वं धर्मज्ञःसन् स्वमात्मजम् ॥ ८६ ॥
न वाससां न रामाणां नापां स्पर्शस्तथाविधः ।
शिशोरालिङ्ग्यमानस्य 31 स्पर्शः सूनोर्यथा सुखः ॥ ८७ ॥
ब्राह्मणो द्विपदां श्रेष्ठो गौर्वरिष्ठचतुष्पदाम् ।
गुरुर्गरीयसां श्रेष्ठः पुत्रः स्पर्शवतां वरः ॥ ८८ ॥
स्पृशतु त्वां समाश्लिष्य पुत्रो मे प्रियदर्शनः 32 ।
पश्चादहं गमिष्यामि पितुस्त्वाश्रमं प्रति ॥ ८९ ॥

---

28. A B and S ०श्चतुरा । 29. A ०वर्त्तनीं ।
30. A and B न । 31. B C and S ०रालिङ्गमानस्य । 32. A प्रियदर्शनम् ।

आहर्ता वाजिमेधस्य शतसंख्यस्य पौरव 33 ।
भविता तनयस्तेऽयमित्याह मां गुरुर्मुनिः ॥ ८० ॥
मृगावलुष्टेन हि ते मृगयां परिधावता ।
अहमासादिता राजन् कुमारी पितुराश्रमे ॥ ८१ ॥
उर्वशी पूर्वचित्तिश्च सहजन्या च मेनका ।
विश्वाची च घृताची च षडेवाप्सरसां वराः ॥ ८२ ॥
तासां मां मेनका नाम ब्रह्मयोनिर्वराप्सराः ।
दिवः संप्राप्य जगतीं विश्वामित्रादजीजनत् ॥ ८३ ॥
सा मां हिमवतः प्रस्थे सुषुवे मेनकाप्सराः ।
अवकीर्य च मां याता परात्मजमिवासती ॥ ८४ ॥
किंनु कर्माशुभं पूर्वं कृतवत्यस्मि जन्मनि ।
यदहं बान्धवैस्त्यक्ता बाल्ये संप्रति च त्वया ॥ ८५ ॥

दुष्यन्त उवाच—

न गर्भमभिजानामि त्वयि मत्तेजसार्जितम् ।
असत्यवचना नार्यः कस्ते श्रद्धास्यते वचः ॥ ८६ ॥
मेनका निरनुक्रोशा बन्धकी जननी तव ।
ययासि हिमवत्प्रस्थे निर्माल्यमिव चोज्झिता ॥ ८७ ॥
स चापि निरनुक्रोशः क्षत्रयोनिः पिता तव ।
विश्वामित्रो ब्राह्मणत्वलुब्धः कामवशं गतः 34 ॥ ८८ ॥
मेनकाप्सरसां श्रेष्ठा महर्षीणां पिता च ते ।
तयोरपत्यं कन्या त्वं पुंश्चलीव प्रभाषसे ॥ ८९ ॥
अश्रद्धेयमिदं वाक्यं कथयन्तो न लज्जसे ।
विशेषतो मत्सकाशे दुष्टतापसि गम्यताम् ॥ १०० ॥
कमहर्षिः स 35 चैवोग्रः काप्सराः 36 सा च मेनका ।

---

33. A B and C पौरवः । 34. C °वशानुगः । 35. B and S क । 36. B and S काप्सराः ।

क्व च त्वमेवं कृपणा तापसीवेशधारिणी ॥ १०१ ॥
सुनिकृष्टा च ते योनिः पुंश्चलीव प्रभाषसे ।
यदृच्छया कामरागात् कयाचित् जनिता ह्यसि ॥ १०२ ॥
सर्व्वमेतत्परोक्षं मे यत्त्वं वदसि तापसि ।
नाहं त्वामभिजानामि यथेच्छं गम्यतां त्वया ॥ १०३ ॥

॥ इति श्रीपद्मपुराणे स्वर्गखण्डे शकुन्तलोपाख्याने
तृतीयोऽध्यायः ॥

IV

शकुन्तलोवाच—

राजन् सर्षपमात्राणि परच्छिद्राणि पश्यसि ।
आत्मनो विल्वमात्राणि पश्यन्नपि न पश्यसि ॥ १ ॥
मेनका त्रिदशेष्वेव त्रिदशाश्चानु मेनकाम् ।
ममैवोद्विच्यते जन्म राजेन्द्र तव जन्मतः ॥ २ ॥
क्षितावटसि राजेन्द्र अन्तरीक्षे चराम्यहम् ।
आवयोरन्तरं पश्य मेरुसर्षपयोरिव ॥ ३ ॥
महेन्द्रस्य कुबेरस्य यमस्य वरुणस्य च ।
भवनान्यनुसंयामि प्रभावं पश्य मे नृप ॥ ४ ॥
सत्यश्च जनवादोऽयं तं प्रवक्ष्यामि ते नृप ।
निदर्शनं ब्रवीमीति न कोपं कर्त्तुमर्हसि ॥ ५ ॥
विरूपो यावदादर्शे स्वमुखं नैव पश्यति ।
मन्यते तावदात्मानमन्येभ्यो रूपवत्तमम् ॥ ६ ॥
यदा तु मुखमादर्शे विकृतं पश्यतेऽनः ।
तदेतरं विजानाति स्वमेव नेतरं नरः ॥ ७ ॥
यस्तुस्वाद्रूपसम्पन्नो न स निन्दति कञ्चन ।
अतीव जल्पन् दुर्वाचो भवतोऽह विकत्थनः 1 ॥ ८ ॥
मूर्खो हि जल्पतां नृणां श्रुत्वा वाचः 2 शुभाशुभाः ।
अशुभं वाक्यमादत्ते पुरीषमिव शूकरः ॥ ९ ॥
प्राज्ञस्तु जल्पतां पुंसां श्रुत्वा वाचः शुभाशुभाः ।
गुणवद्वाक्यमादत्ते हंसः क्षीरमिवाम्भसः ॥ १० ॥
अन्यान् परिवदन् साधुर्यथा हि परितप्यते ।
तथा परिवदन्नन्यान् हृष्टो भवति दुर्जनः ॥ ११ ॥

---

1. B and S विपश्चयः । 2. B वाचां ; A and C वाचं ।

अभिवाद्य यथा हृद्यान् सन्तो गच्छन्ति निर्वृतिम् ।
एवं सज्जनमाक्रुश्य मूर्खो भवति निर्वृतः ॥ १२ ॥
सुखं जीवन्त्यदोषज्ञा मूर्खा दोषानुदर्शिनः ।
यत्र वाच्याः परैः सन्तः परानाहुस्तथाविधान् ॥ १३ ॥
अतो हास्यतरं लोके किञ्चिदन्यन्न विद्यते ।
यत्र दुर्जन इत्याह दुर्जनः सज्जनं स्वयम् ॥ १४ ॥
सत्यधर्मच्युतान्नृणां क्रुद्धादाशीविषादिव ।
अनास्तिकोप्युद्विजते जनः किं पुनरास्तिकः ॥ १५ ॥
क्षयमुत्पाद्य वेगर्भं न ममेति वदत्यहो ।
तस्य देवाः श्रियं घ्नन्ति न च लोकानुपाश्नुते ॥ १६ ॥
पुत्रस्ते3 भवितारावन्नपुत्रस्य महागुणः ।
चक्रवर्त्ती राजराज उत्तमः सर्वधन्विनाम् ॥ १७ ॥
स त्वं नृपतिशार्दूल न पुत्रं त्यक्तुमर्हसि ।
आत्मानं सत्यधर्मौच पालयन् पृथिवीपते ॥ १८ ॥
वरं कूपशताद्वापी वरं वापीशतात्क्रतुः ।
वरं क्रतुशतात्पुत्रः सत्यं पुत्रशताद्वरम् ॥ १९ ॥
अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
अश्वमेधसहस्राद्धि 4 सत्यमेवातिरिच्यते ॥ २० ॥
राजन् सत्यं परं ब्रह्म सत्यं [च5] समयः परम् ।
मात्याक्षीः समयं राजन् सत्यं सङ्गतमस्तुते ॥ २१ ॥
अनृते चेन्मसङ्गस्ते श्रद्दधासि न चेत्स्वयम् ।
कण्वस्येवाश्रमं गच्छे त्वादृशे नास्ति संगतम् 6 ॥ २२ ॥
ऋतेऽपि 7 त्वां महाराज शैलराजावतंसकाम् ।
चतुर्वर्णामिमामुर्वीं पुत्रो मे पालयिष्यति 8 ॥
मुनेः कण्वस्य वै वाक्यं भविता कथमन्यथा ॥ २३ ॥

---

3. A B and C पुत्रोमे । 4. A •क्षात्तु । 5. Supplied. 6. A संगतः ।
7. B and S read च after ऋतेऽपि । 8. A B and S शासयिष्यति ।

राजोवाच—

किं नालपन्ति पुंश्चल्य एवमेव सुदुर्व्वचः ।
याहि त्वं गच्छ 9 वाचाटे दूषयिष्यन्ति मां जनाः ॥ २४ ॥

पुरोहित उवाच—

अत्र वक्ष्यामि ते मन्त्रं शृणु राजन् महामते ।
यावत्प्रसवमत्रैव नारी तिष्ठतु ते गृहे ॥ २५ ॥
यदि ते सदृशं पुत्रं कामिन्येषा प्रसोष्यति 10 ।
ततस्त्वयैव भार्य्येति वेत्स्यामस्तदनन्तरम् ॥
शालिबीजादिजायेत न कदाचिद्यवाङ्कुरः ॥ २६ ॥

राजोवाच—

नैषा शुद्धान्तमध्येऽपि 11 मम वासमिहार्हति ।
संसर्गादपि पुंश्चल्यो दूषयन्ति कुलस्त्रियः ॥ २७ ॥

पुरोहित उवाच—

अदृष्टतनयास्योसि राजराजोऽपि भूतले ।
अतस्ते सन्ततौ श्रद्धा राजन् मे जायतेऽधिका ॥ २८ ॥
इयं साध्वी वरारोहा कण्वेन परिपालिता ।
व्यभिचारमतो राजन्नाहं मन्ये मनागपि ॥ २९ ॥
यावत्प्रसवमेतान्तु वासयेऽहं निजालये ।
प्रसवे सति कल्याणीं स्वयमेव ग्रहीष्यसि ॥ ३० ॥
इत्युक्त्वा गौतमो ब्रह्मन् सान्त्वयित्वा शकुन्तलाम् ।
स्वगृह्यायैव तां नेतुं विमनामुपचक्रमे ॥ ३१ ॥
सा चापि मुक्तकण्ठं वै रुदती मृगलोचना ।
शनैः शनैर्गौतमं तमनुगन्तुं प्रचक्रमे ॥ ३२ ॥
एतस्मिन्नन्तरे विप्र मेनकाप्सरसां वरा ।
तेजोरूपा व्योममध्यात्तडित्पातं पपात सा ॥ ३३ ॥

---

9. A याहि । 10. B and S प्रसोष्यते । 11. B and C ०मध्येति ।

किमिदं किमिदं चित्रमिति जल्पत्सु सर्वतः ।
सभास्थेषु च सर्वेषु तेजसा धर्षितेषु च ॥ ३४ ॥
आलोकनेऽप्यशक्तेषु दुष्यन्ते भयविह्वले ।
शकुन्तलां समादाय अङ्कमारोप्य सत्वरम् 12 ॥
अम्बरं विजगाहे सा तत्केनापि न लक्षितम् ॥ ३५ ॥
एवं गते तु दुष्यन्तः खेदमाप ततो भृशम् ।
दैवेन रचितां मायाममन्यत तदा नृपः ॥ ३६ ॥

इति श्रीपद्मपुराणे स्वर्गखण्डे शकुन्तलोपाख्याने चतुर्थोऽध्यायः ।

---

12. C सत्वरा ।

V

शेष उवाच—

एकदा स महीपालो मन्त्रिभिर्ब्राह्मणैः सह ।
प्रजानां वेदितुं वृत्तं बभ्राम नगरे द्विज ॥ १ ॥
तत्र राजभटः कश्चिद्दृढमाबध्य धीवरम् ।
दण्डेन ताडयन्नुग्रैर्वचोभिः समतर्जयत् [1] ॥ २ ॥
राजाभरणमेतद्वै यत्त्वया चोरितं छलात् ।
अतो [2] बध्यत्वमापन्नं त्वां नयामि नृपान्तिके ॥ ३ ॥
इत्युक्त्वा तं करे गृह्य ताडयन् बहु मूर्धनि ।
राजान्तिकमुपानीय राजानमिदमब्रवीत् ॥ ४ ॥
एष धीवरको राजंश्चोरयित्वाङ्गुरीयकम् ।
त्वन्नामचिह्नितं लोके विदितं रत्ननिर्मितम् ॥
विक्रेतुमुद्यतः पापो मया दृष्टो महीपते ॥ ५ ॥
राजा तं प्राह दाशेदं कुतो लब्धमिदं त्वया ।
कथयाभयमेतत्ते दत्तं जानीहि सांप्रतम् ॥ ६ ॥

धीवर उवाच—

जात्याहं धीवरो राजन् मत्स्यमात्रोपजीवकः [3] ।
चौरिकां नैव जानामि न च सूनां न धूर्त्तताम् ॥
जालेन मत्स्यान् बध्नामि सरस्त्वत्या हि रोधसि ॥ ७ ॥
एकदा जालमाततत्र सरस्त्वत्यामहं नृप ।
स्थितः प्रत्याशया तत्रतीरस्थं तरुमाश्रितः ॥ ८ ॥
रोहितः कोऽपि बलवान् जाले बद्धो बभूव ह ।
ततोऽहं जालमुत्तार्य दृष्ट्वा रोहितमुद्यतम् ॥ ९ ॥
खड्गेन क्षत्तवान् सद्यः परमानन्दनिर्वृतः ।
ततस्तदुदरे लब्ध मेतद्भूपाङ्गुरीयकम् ॥ १० ॥

---

1. C समताडयत । 2. A and B बधो । 3. C ०जीविनः (जीवनः ?)

कस्येति न विजानामि तदहं नगरे तव 4 ।
विक्रेतुमागतो वङ्गो भटेनानेन भूमिप ॥ ११ ॥

राजोवाच—

देहि पश्यामि कस्येतत् किंरूपमङ्गुरीयकम् ।
त्वमेतन्मूल्यमादाय सुखेनैव व्रजालयम् ॥ १२ ॥
इत्युक्त्वा पाणिनादाय यावद्राजा स पश्यति ।
निपतन्ति स्म नेत्राभ्यां तावदेवाश्रुबिन्दवः ॥ १३ ॥
प्रेयसीं तामनुस्मृत्य तथा गान्धर्वकर्म च ।
गर्भाधानञ्च सर्वं तत् मूर्च्छितो निपपात ह ॥ १४ ॥
तदा पुरोहितामात्या भृशमुद्विग्नचेतसः 5 ।
उत्थाप्य तं महीपालं निवेश्य च वरासने ॥
लब्धसंज्ञं शनैर्ब्रह्मन् पप्रच्छुः किमिदं तव ॥ १५ ॥
दुष्यन्तोऽपि समाश्वस्य प्रेयसीं तामनुस्मरन् ।
निश्वस्य दीर्घमुष्णञ्च अश्रुमिश्रमभाषत ॥ १६ ॥
प्रत्याख्याता वरारोहा मन्दभाग्येन यन्मया ।
तदद्य मां दुनोत्येवमङ्गुरीयस्य दर्शनात् ॥ १७ ॥
तया यदुक्तं मां प्राप्य मम तेजो दधानया ।
नानृतं तच्च वै किञ्चिन्मयैवानृतकंकृतम् ॥ १८ ॥
मृगयाचारिणारण्ये सैव कण्वाश्रमे मया ।
गान्धर्वेणैव धर्मेण निर्बन्धेन विवाहिता ॥ १९ ॥
उषितञ्च तया सार्धं प्रतिज्ञातञ्च सर्वथा ।
बलेन चतुरङ्गेन नयिष्ये नगरं प्रति ॥ २० ॥
अभिज्ञानञ्च मे दत्तमेतद्रत्नाङ्गुरीयकम् ।
केनापि दैवयोगेन सर्वं तद्विस्मृतं मया ॥ २१ ॥
हन्त पापं कृतं भूरि मया निष्करुणात्मना ।
आसन्नप्रसवा भार्या त्यक्ता देवसुतोपमा ॥ २२ ॥

---

4. C नृप । 5. A तदा पुरोहितोऽमात्यो भृशमुद्विग्नचेतनः ; S पुरोहिती । for पुरोहिता ।

अनुकूलो न मे धाता नरकान्न च निष्कृतिः ।
प्रतिज्ञापूर्वकं पाणिग्रहीता यद्विवर्जिता ॥ २३ ॥
श्रो रूपिणो समागत्य स्वयमेव कृपान्विता ।
अर्पयन्तो महारत्नं यथा केनापि वर्ज्यते 6 ॥ २४ ॥
तथा मया पुत्रफला परा साध्वी पतिव्रता ।
याचमाना सवैयग्र्यं दूरादेव विवर्जिता ॥ २५ ॥
मेनकाप्सरसा जाता विश्वामित्रसुता सती ।
कण्वेन पालिता कन्या चारुशीला तपस्विनी ॥ २६ ॥
चिन्तामणिरिवायाता काममर्पयितुं स्वयम् ।
मया निराकृताबाला अन्तःसत्त्वा सुलोचना ॥ २७ ॥
कल्पवल्लीव कामानां संप्रदानेऽभ्युपस्थिता ।
उन्मूलिता मया तन्वी प्रसोष्यन्ती नरोत्तमम् ॥ २८ ॥
संरक्तारुणनेत्राया: स्मरचापायितभ्रुवः ।
वचांसि गूढगर्वाणि विदुन्वन्ति स्मृतानिमाम् ॥ २९ ॥
एवं विलपमानं तं राजानं गौतमोऽब्रवोत् ।
तद्गतं 7 नानुशोचस्व समाश्वस परन्तप ॥ ३० ॥
कथितञ्च मया तत्र दृष्ट्वा तस्याः सुलक्षणम् ।
तद्रूपशालिनी8 बाला राज्ञो भवितुमर्हति ॥ ३१ ॥
सा हि मेनकया जाता चारुरूपा तपस्विनो 9 ।
देवीव नावमानार्हा त्वया राजन् विवाहिता ॥ ३२ ॥
यद्गतं महदाश्चर्यं प्रत्याख्यातवति त्वयि ।
तद्दृष्ट्वा के न शोचन्ति वदन्तस्त्वां हृतश्रियम् ॥ ३३ ॥
भद्रं वाप्यथवाभद्रं प्रियमप्रियमेव वा ।
यद्गतं 10 तद्गतं राजन् नानुशोचन्ति पण्डिताः ॥ ३४ ॥

---

6. S केनापि वर्ज्यते ; C देवसुतोपमा C repeats verses 23 and 24
7. S तद्यातं। 8. A and C सद्रूप०। 9 A मनस्विनी। 10. S यद्यातं।

शेष उवाच—

विसृष्टस्त्वेव तेष्वेव देशान्तरचरश्चरः ।
राज्ञे निवेदयामास यद्दृष्टं सागराम्भसि ॥ ३५ ॥

चर उवाच—

राजन् सांयात्रिको नाम्ना धनदृद्धिर्महाबलः ।
विपन्नः सागरे सप्त वाहयन् सभृतास्तरीः 11 ॥ ३६ ॥
स चानपत्यस्तस्येष्टा नावो रत्नेन पूरिताः ।
तवैव कोषमर्हन्ति गृह्यतामचिरेण ताः ॥ ३७ ॥

राजोवाच—

यान्तु मे मन्त्रिणः सम्यग् जानन्तु तत्परिग्रहान् ।
यदि काचिन्नवेज्ञार्या गर्भिणी वणिजः क्वचित् ॥
सैव तद्धनमादद्यान्नाधिकारी तदा नृपः ॥ ३८ ॥
तच्छ्रुत्वा मन्त्रिणो गत्वा विज्ञाय च विशेषतः ।
राज्ञे निवेदयामासुर्वृत्तान्तं ब्राह्मणर्षभ ॥ ३९ ॥
अत्रैव नगरे राजन् भार्या तस्य विलासिनी ।
अन्तःसत्त्वा वणिक्पुत्रो वर्त्तते च पतिव्रता ॥ ४० ॥
राजा प्राह तरोस्थानि 12 यानि यानि धनानि च ।
तानि तस्यै ददत्वद्य भटा मे यान्तु सत्त्वराः ॥ ४१ ॥
इति प्रस्थाप्य राजेन्द्रो भटांस्तद्धनरक्षणे ।
द्विगुणेनैव शोकेन दह्यते स्म ततोऽब्रवीत् ॥ ४२ ॥
ममाप्यन्त एवमेव मम राज्यस्य दुर्गतिः ।
कं यास्यति महीयं हि धार्मिकं वाप्यधार्मिकम् ॥ ४३ ॥
अन्तःसत्त्वा महाभागा या सा भार्याप्युपस्थिता ।
उपेक्षिता प्रमादेन मन्दभाग्येन सा मया ॥ ४४ ॥

11. B गच्छतास्तरीः । 12. C तरिस्थानि ।

अत ऊर्ध्वं मया दत्तं पानीयं विधिनापि 13 च ।
पास्यन्ति पितरः कोष्णनिश्वासेन मलोमसम् ।
पिण्डविच्छेददुःखार्ताः पिण्डानि च तदैव हि ॥ ४५ ॥
क्व लभ्यते सा ललना साक्षाच्छौरिव रूपिणी ।
न मन्दभाग्यं पापिष्ठं ज्ञात्वा मां पुनरेष्यति ॥ ४६ ॥
नैवं विधस्य दुष्टस्य दारुणस्य दुरात्मनः ।
तथाविधा वरारोहा भार्या भवितुमर्हति ॥ ४७ ॥
एवं विलपमानस्य दुष्यन्तस्य महीपतेः ।
व्यतीयुस्त्रीणि वर्षाणि शोचतोऽहर्निशं द्विज ॥ ४८ ॥
अथासौ देवराजेन समाहूतो ययौ दिवम् ।
त्रिदिवेशैरबध्यानां निधनाय सुरद्विषाम् ॥ ४९ ॥
निर्वाह्य देवताकर्म रथं मातलिसारथिम् ।
आरुह्य भुवमायास्यन् मारीचाश्रममभ्ययात् 14 ॥ ५० ॥
तत्रकाचिज्जरा नारी ब्राह्मणी बालमद्भुतम् ।
लालयन्ती नृपं वीक्ष्य ददावासनमन्तिके ॥ ५१ ॥
बालस्तु तावद्वेगेन प्रविश्य गहनं वनम् ।
निबध्य पञ्च पञ्चाश्यान् लताभिः समुपानयत् ॥ ५२ ॥
उवाच दृष्ट्वामीषां कति दन्ताः समुन्नताः ।
निम्ना वा कति मध्यावा गणयित्वा वदाशु मे ॥ ५३ ॥
दुष्यन्तस्तु तदालक्ष्य बालस्याद्भुतविक्रमम् ।
चिन्तयामास मेधावी भार्याविरहकातरः ॥ ५४ ॥
पौरवादप्यहो बालो धत्तेऽधिकपराक्रमम् 15 ।
सर्व्वराजश्रियायुक्तो न विप्रस्तदयं भवेत् ॥ ५५ ॥
क्षेत्रो मे वहते स्नेहं दृष्ट्वा बालं दुरासदम् ।
कारणं तत्र पश्यामि यन्ममेयमपुत्रता ॥ ५६ ॥

---

13. S विविधानि च। 14. A B and S ०मागमत्। 15. A omits 55a.

इति चिन्तापरे राज्ञि सिंहः कोऽपि खबन्धनम् ।
छित्त्वा नखेन दुर्वार्यो गन्तुं प्राक्रमत द्विज ॥ ५७ ॥
दूरादुत्प्लुत्य तं बालो निगृह्य पुनरेव तम् ।
उवाच किंरे पश्चास्य प्राप्तोऽसि ब्रह्मबालकम् I6 ॥
पौरवोऽस्मि न जानासि क्षत्रियो रणकोविदः ॥ ५८ ॥
तदुपश्रुत्य राजर्षेः किञ्चिदुच्छ्वसितं मनः ।
बालभाषितमित्येव सम्यक् श्रद्दापिनाभवत् 17 ॥ ५९ ॥
अथागमत् काश्यपोऽपि वनात्कुशसमिद्वरः ।
विलोक्य तत्र राजानं दुष्यन्तं मुमुदे भृशम् ॥ ६० ॥
आशीर्भिस्तमथाभ्यर्च्य विधायातिथिसत्क्रियाम् ।
पप्रच्छ कुशलं राज्ये देवानाञ्च तपोधनः ॥ ६१ ॥
राजा तत्सर्वमाचष्टे मुनिवाचा गतश्रमः ।
अथोवाच विहस्येषत् कोऽयं बालस्तपोधन ॥
महाबलो महाबाहुः पौरवोहमिति ब्रुवन् ॥ ६२ ॥

कश्यप उवाच—

तवैव तनयो राजन् यमसूत शकुन्तला ।
दमनः सर्वसत्त्वानां सिंहादीनां महाबलः ॥ ६३ ॥
तत्सर्वदमनो नाम मयैवास्य निरूपितम् !
भरस्वेति च वक्ष्यामि त्वां ततोऽसौ भरतो भवेत् ॥ ६४ ॥
दुर्वाससो हि शापेन त्वया या विस्मृता पुरा ।
त्यक्ता मेनकयानीय मयि न्यस्ता मनस्विनी ।
सा ते शकुन्तला राज्ञो सुषावेमं कुमारकम् ॥ ६५ ॥
महाबलो महाप्राणो दुर्द्धर्षः सर्वभूभुजाम् ।
बद्धैः क्रीडति पश्चास्यैः प्रविभेत्यपि नान्तकात् ॥ ६६ ॥

---

16. A omits 58a.

17, B श्रद्दापि न भवेत् ; A प्रज्ञापि नाभवत् ; S श्रद्धापि नो भवेत् ।

मया विसृष्टं दुर्दान्तः शिशुरेष ममाश्रमे ।
वस्तुं नार्हति बाल्याद्धि कदा किं नु समाचरेत् ॥ ६७ ॥
अत एनं महीभर्तुः सुतं तं प्रापयाम्यहम् ।
त्वमथो देवकार्यार्थं गतः स्वर्गं ततो मया ॥ ६८ ॥
कृतो विलम्बो राजर्षे शापान्तेऽपि तव प्रभो ।
एषते गृह्णतां पुत्रश्चक्रवर्त्ती भविष्यति ॥
आहर्त्ता सर्वयज्ञानां महाभागवतो नृप ॥ ६९ ॥
इत्युक्त्वा ब्राह्मणीं प्राह हृष्टां देवगुरुर्मुनिः ।
शकुन्तलामिहानीय समर्पय महीपतौ ॥ ७० ॥
इत्युक्ता ब्राह्मणी गत्वा समाहूय शकुन्तलाम् ।
राज्ञे समर्पयामास राजा च मुमुदे भृशम् ॥ ७१ ॥
अथानुज्ञाप्य 18 मारीचं सभार्य्यः 19 ससुतो नृपः ।
हृष्टः स्वपुरमागच्छद्देवयानेन मारिष ॥ ७२ ॥
स एव भरतो नाम दुष्यन्ततनयो महान् ।
ववृधे तत्र विप्रेन्द्र शुक्लपक्षे यथा शशी ॥ ७३ ॥

॥ इति श्रीपद्मपुराणे स्वर्गखण्डे शकुन्तलोपाख्यानं समाप्तम्
पञ्चमोऽध्यायः ॥

---

18. C यथा। 19. B सभार्य्यं।

VI

शेषउवाच—

दिलीपस्तु महाभाग सर्वसद्गुणभूषितः ।
महोरस्को महाप्राणो महास्कन्धो महाभुजः ॥ १ ॥
तेजसा भानुवद्वीरो हिमवानिव भूपतिः ।
समुद्र इव गम्भीरो मेरुवद्दृढसारवान् ॥ २ ॥
क्षमया भूमिसदृशः 1 प्रजापालो मनुर्यथा ।
नादण्ड्यान् दण्डयामास ब्राह्मणांश्च क्रतागसः ॥ ३ ॥
वेदवेदाङ्गनिपुणो 2 राज्यशास्त्रविशारदः ।
देवब्राह्मणभक्तश्चाप्यनुरक्तप्रजः सदा ॥ ४ ॥
कन्यां 3 मगधराजस्य नाम्ना विप्र सुदक्षिणाम् ।
उपयेमे महाशीलां पतिव्रतपरायणाम् ॥ ५ ॥
तां लब्ध्वा महिषीं राजा रूपौदार्यगुणान्विताम् ।
राज्यं चकार सुचिरं प्रजा धर्मेण रञ्जयन् 4 ॥ ६ ॥
एकातपत्रां पृथिवीं चकार भुजदर्पतः ।
न लेभे तनयं राजा चिरेणापि कुलोचितम् ॥ ७ ॥
अथ मन्त्रिषु विन्यस्य राज्यभारं महामतिः ।
सार्द्धं स्वभार्यया 5 प्रायाद्वशिष्ठस्याश्रमं प्रति ॥ ८ ॥
दम्पतीरथमास्थाय वृद्धसारथिसंहितम् ।
वशिष्ठस्याश्रमं प्राप सायं शिष्यगणायुतम् ॥ ९ ॥
वेदध्वनिपराभूतसमस्तदिग्विमण्डलम् 6 ।
स्कन्धासक्त7समिद्भारैः प्रत्यायातैर्वनान्तरात् ॥ १० ॥

---

1. B and C ०सदृशो । 2. A and C राजशास्त्र० । 3. Aकन्या ।
4. A and B रचयन् । 5. C सभार्यया ।
6. Emendation. A ०समस्तदिगमण्डलम् ; B ०समस्तादगमण्डलम् ; C. ०समस्तादिग्विमण्डलम् । 7. C ०शक्त ।

शिष्यैः प्रपूर्यमाणश्च सायं सन्ध्यार्थिभिर्द्रुतम् ।
मुनिकन्यागणैः सिच्य तरुमूलानि सर्व्वतः ॥ ११ ॥
विश्रमार्थं निषण्णैश्च परितः परिशोभितम् ।
मृगाणां तर्णकै 8 र्बालैरालवालजलाशनैः ॥
उत्प्लुत्योत्प्लुत्य गच्छद्भिर्नर्त्तकैरुपशोभितम् 9 ॥ १२ ॥
विसृज्य यत्र वैराणि मृगेन्द्राद्या महामते ।
न जघ्नुर्हरिणान् ब्रह्मन् साधवः करुणा यथा ॥ १३ ॥
तमाश्रममथ प्राप्य दिलीपः स नराधिपः ।
ववन्दे मुनिमासीनं सायं कृत्वादनन्तरम् ॥ १४ ॥
राजानमानतं दृष्ट्वा संयोज्य परमाशिषा ।
पप्रच्छ श्लक्ष्णया वाचा तस्यागमनकारणम् ॥ १५ ॥
कच्चित्ते कुशलं राजन् राज्यस्य च पुरस्य च ।
प्रजानां प्रकृतीनाञ्च धर्मस्य सकलस्य च ॥ १६ ॥
सह पत्न्या यदायातो भवानत्र नराधिप 10 ।
तेन मन्ये भवेत्कश्चित्तव 11 कार्यस्य गौरवम् ॥ १७ ॥
अथोवाच महीपालो राज्यस्य कुशलं सदा ।
प्रजानां प्रकृतीनाञ्च धर्म्मस्य सकलस्य च ॥ १८ ॥
एषा ब्रह्मंस्तव बधूर्भार्या मम सुदक्षिणा ।
न धारयति यद्गर्भं तेन दुःखं ममाद्य वै ॥ १९ ॥
मत्पूर्वैः पालिता पृथ्वी मयापि परिरक्षिता ।
मत्तः परमिदं राज्यं कञ्चिदन्यं गमिष्यति 12 ॥ २० ॥
ककुत्स्थस्य तु वंशोऽयं मया परिसमाप्यते ।
मत्तोऽथ दुर्लभः पिण्डः पूर्वेषां परमेव हि ॥ २१ ॥

---

8. तन्नकै । 9 A and C °रिवशोभितम् । 10. B नराधिपः ।
11. Read किञ्चित्तव ? 12. A. मत्तः परं कञ्चिदन्यमिदं राज्यं गमिष्यति ।

वंशविच्छेदकर्त्ताहं पितॄणां दुःखकारणम् ।
तदस्यां जायते पुत्रो यथा ब्रह्मन् कुलोचितः ।
13 तद्विधेहि कृपापूर्वं त्वं हि नः परमो गुरुः ॥ २२ ॥
तत् श्रुत्वा वचनं तस्य चिरं दध्यौ तपोधनः ।
अथासुं बोधयामास सन्ततिस्तम्भकारणम् ॥ २३ ॥

वशिष्ठ उवाच—

शक्रेणासि 14 समाहूतो दैत्यानां वधकारणात् ।
तदा देवालयं यातस्त्वमकार्षीः सुरप्रियम् ॥ २४ ॥
अथामन्त्र्य तुरासाहमागच्छन् 15 पृथिवीं नृप ।
रथेन वायुवेगेन शक्रदत्तेन 16 भारिष ॥ २५ ॥
सुदक्षिणामृतुस्नातां स्मृत्वा जातत्वराधिकः ।
विलोकितः सुरभ्या त्वं कल्पतर्व्वङ्घ्रिसंस्थया ॥ २६ ॥
साजुहाव 17 भवन्तं वै प्रीतिपूर्वं पुनः पुनः ।
नाश्रौषोस्त्वं तदाह्वानं न चाकार्षीः प्रदक्षिणम् ।
तेन रुष्टा शशापासौ यत्तत् शृणु महीपते ॥ २७ ॥
मामवज्ञाय यद्यासि सन्तानार्थं त्वरान्वितः ।
न भविष्यति तत्पुत्रो मदंशाराधनं विना ॥ २८ ॥
शापस्तु न श्रुतो राजंस्त्वया सारथिनापि न ।
कूजत्सु रथचक्रेषु नदत्सु दिगिभेषु च ॥ २९ ॥
एतत्ते कथितं राजन् सन्ततिस्तम्भकारणम् ।
प्राप्नोति न हितं कश्चिदपराधी महीयसाम् ॥ ३० ॥

राजोवाच—

लब्धव्यं तत् कुतो गोत्रं मया तस्यास्तपोधन ।
आराधयामि यद्गत्वा कस्य तद्विधिरुच्यताम् ॥ ३१ ॥

---

13. A तं विधेहि। 14. A and C शक्रेणापि। 15. A and C तुरासाहं मागच्छन्। 16. A and B शक्रे दत्तेन। 17. A आजुहाव।

वशिष्ठ उवाच—

इयं या 18 नन्दिनी नाम होमधेनुः पयस्विनी ।
आश्रमं मम सत्कृत्य चिरं वसति भूमिप ॥ ३२ ॥
तस्या एकान्तरापत्यं तव सिद्धिं प्रदास्यति ।
आराध्यतामियं सम्यक् भार्यया च सह त्वया ॥ ३३ ॥
भविष्यति कुमारस्ते गुणैर्बहुभिरन्वितः ।
आराधनविधिं वक्ष्ये शृणु राजन्महामते ॥ ३४ ॥
इति ब्रुवति तस्मिन्वै मुनौ परमवाग्मिनि ।
नन्दिनी सा समेयाय काननान्तादनिन्दिता । ३५ ॥
तां दृष्ट्वा तु समायातां नृपमाह तपोधनः ।
नाम्नि कीर्तित एवासौ यदायाति सुमङ्गला ॥ ३६ ॥
तत्सिद्धिं तव राजेन्द्र विद्धि हस्तगतामिव ।
आराधनेन तदिमां प्रसादय नियन्त्रितः ॥ ३७ ॥
यदैषा यास्यति प्रातर्वनाय नृप नन्दिनी ।
पश्चात्त्वमनुगच्छेथा अनुतिष्ठेरपि 19 स्थिताम् ।
निषण्णायां निषीदेथाः पिबन्त्यां च जलं पिबेः ॥ ३८ ॥
सुदक्षिणा च सुदती नियमस्था मनस्विनी ।
प्रातरन्वेतु सायं तु प्रत्युद्गम्यानयेद्गृहम् ॥ ३९ ॥
इत्थमेव महाराज समाराधय नन्दिनीम् ।
साधयिष्यति ते श्रेयो मा विषादे मनः कृथाः ॥ ४० ॥
इति प्रबोध्य राजानं वशिष्ठः स तपोधनः ।
राजानमतिथिं चक्रे वन्यैरेव फलादिभिः ॥ ४१ ॥
अरुन्धती तु प्रणतां समाश्लिष्य सुदक्षिणाम् ।
आशिषा योजयामास न चिराद्भव पुत्रिणी ॥ ४२ ॥

---

18. A and C हि । 19. A and C ०मनुतिष्ठेरपि ।

राज्ञो निवासयामास 20 स्त्रोधर्मैः समुदाहृतैः 21 ।
राजापि धर्मान् शुश्राव विविधांश्च तपोधनात् ॥ ४३ ॥

॥ इति श्रीपद्मपुराणे पातालखण्डे दिलीपसुदक्षिण 22 चरिते
वशिष्ठसमागमो नाम पञ्चमोऽध्यायः ॥

---

20. B निसमयामास । 21. A and C सुदाहृतैः ।
22. B omits °सुदक्षिण° ।

VII

शेष उवाच—

व्युष्टायामथ यामिन्यां तं प्रणम्य तपोधनम् ।
पोतवत्सां महाभाग दिलीपो धेनुमासुचत् ॥ १ ॥
सुदक्षिणा ततो गत्वा गन्धमाल्यैः 1 सुगन्धिभिः ।
पूजयामास सुदती मुनिपत्न्यानुशिक्षिता ॥ २ ॥
अथ प्रवृत्ता सा गन्तुं नन्दिनी द्विजनन्दन ।
राजापि तामनुययौ पश्चादपि सुदक्षिणा ॥ ३ ॥
निवर्त्त्य भृत्यवर्गञ्च ततो राजा सुदक्षिणाम् ।
प्रत्यावर्त्य स एकाकी धेनुमन्वगमद्बली ॥ ४ ॥
तृणानि नव्यान्यादाय ददौ तस्यै नराधिपः ।
चामरेण च दंशादीन्वारयत्यनिशं तनोः ॥ ५ ॥
सा स्वच्छन्दगतिर्धेनुः प्रविवेश यतो यतः ।
व्यालान्निवारयन् राजा तत्र तत्रान्वगच्छत ॥ ६ ॥
तिष्ठन्त्याञ्च नृपस्तस्थौ गच्छन्त्यां पुनरन्वगात् ।
निषसाद निषण्णायां 2 पिबन्त्यामपिबत्पयः ॥ ७ ॥
परिचक्राम गहनं सा धेनुः परितो द्विज ।
गह्वरे कण्टकाकीर्णे गुहायां पर्व्वतस्य च ॥ ८ ॥
अगम्येषु च गम्येषु दुर्गमेषु च नन्दिनी ।
याति भक्तिपरीक्षार्थं नृपस्तामनुगच्छति ॥ ९ ॥
सायं निवर्त्तते धेनुराश्रमाय तपस्विनः ।
सुदक्षिणा समादाय गन्धमाल्यानि भाजने ॥ १० ॥
भृङ्गारेण जलं स्वच्छं स्वयं प्रत्युज्जगाम ह ।
अक्षालयत्ततः 3 पादान् प्रणिपत्य सुदक्षिणा ॥ ११ ॥

---

1. B and C गन्धैर्माल्यैः । 2. Emendation. A and B निषण्णायां निषसाद . निषसादा निषण्णायां । 3. C corrects अ० as प्र० in the margin.

क्षुरेभ्यो 4 रेणूनुद्धृत्य ववन्दे च पुनः पुनः ।
आनर्च्च गन्धमाल्येश्च शष्पाणि 5 च ददौ पुरः ॥ १२ ॥
व्यलिपन्नवतैलेन शृङ्गयोरन्तरं सती ।
राजापि स्वकरेणास्या ममार्ज गलकम्बलम् ॥ १३ ॥
गात्रकण्डूयनं चक्रे चामरेण न्यवीजयत् 6 ।
दोहावसाने तां धेनु कृतसन्ध्याजयोनृपः ॥ १४ ॥
सभार्य्यः परिचर्य्यायां पुनः प्रवृत्ते द्विज ।
धूपं दत्त्वा ततः स्थाने दीपञ्च पुरतोन्यधात् ॥ १५ ॥
तस्थौ तस्याः समीपे स 7 सभार्य्यः कृतजागरः ।
एवं निषेवमानस्य तां धेनुं जगतीपतेः ॥ १६ ॥
व्यगमन् व्रतयुक्तस्य 8 सभार्य्यस्यैकविंशतिः ।
दिनानि सुतलाभाय दुःखेष्वपि सुखानि वै ॥ १७ ॥
अन्येद्युः सा वशिष्ठस्य होमधेनुर्महीपतेः ।
व्रतदार्ढ्यं परीक्षन्ती प्रविवेश हिमालयम् ॥ १८ ॥
नम्रोयं सुरभेधेनुर्न प्रधर्ष्या 9 हि हिंस्रकैः ।
इति विश्वासवान् राजा शोभामैक्षत भूभृतः ॥ १९ ॥
क्षणादलक्षितां तां तु सिंहो भीमपराक्रमः ।
जग्राह बलवान् ब्रह्मन्नादेनापूरयन्दिशः ॥ २० ॥
स शब्दो नृपतेस्तस्य कम्पयामास मानसम् ।
पराहत्य ददर्शाथ सिंताक्रान्ताञ्च नन्दिनीम् ॥ २१ ॥
क्रन्दमानां सकरुणं विक्षिपन्तीं क्षुरान्मुहुः ।
सज्यंकृत्वा ततश्चापं योजयामास सायकम् ॥ २२ ॥
हरिं हन्तुं महाराजः साहसं परमाश्रितः ।
तस्तम्भाते भुजौ तस्य सकोपस्य महीपते ॥ २३ ॥

---

4. A reads •रे in the margin ; Cखुरेभ्यो । 5. B सस्यानि ; C पुष्पाणि ।
6. C चामरेणाप्यवीजयत् । 7. A and B समीपेन । 8. Bव्यगच्छद्व्रतयुक्तस्य ।
9. C प्रधृष्या ।

अदह्यत स्वतेजोभिः स्वयमेव महीपतिः 10 ।
चित्रार्पित इवातिष्ठच्चापापितकरस्तदा ॥ २४ ॥
सिंहस्तमाह राजेन्द्र त्वद्वैवायं श्रमस्तव ।
मुक्ता अपि न ते बाणाः प्रवेक्ष्यन्ति तनुं मम ॥ २५ ॥
भृत्योऽहं देवदेवस्य गौरीभर्त्तुः पिनाकिनः ।
कुम्भोदरोऽस्मि विख्यातो भवान्याश्च प्रियः सदा ॥ २६ ॥
कोऽन्यो धर्षयितुं शक्यो धेनुमेनां तपस्विनः ।
निवर्त्तस्व महाराज न श्रमं कुरु पार्थिव ॥ २७ ॥

राजोवाच—

अहो त्वं देवदेवस्य किंकरोस्यप्रियंकरः ।
धर्म्मांश्च सर्व्वान् जानासि धेनुं रक्षसि किं तत ॥ २८ ॥
इयं हि सुरभेर्देव्या नप्त्री धेनुस्तपस्विनः 11 ।
वशिष्ठस्य क्रियासिद्धौ क्षपयैवावतिष्ठते ॥ २९ ॥
तस्यां तव प्रहारोऽयं मृगराज न शोभते ।
कथं वा सिंहरूपेण वने भ्राम्यसि तद्वद ॥ ३० ॥

सिंह उवाच—

देवदारुरयं देव्या स्वयं यत्नैरुपार्जितः ।
स्तन्येन पयसा स्कन्दपीतशेषेण वर्द्धितः ।
तेन पुत्राधिकस्नेहो भवान्यास्मिंस्तरौ नृप ॥ ३१ ॥
कदाचिदस्य वन्येन त्वगुन्मथ्य विचालिता ।
कटं कण्डूयमानेन मदमत्तेन दन्तिना ॥ ३२ ॥
पार्व्वतो तु तदालोक्य शोकव्याकुलचेतना ।
रुरोद पुरतो भर्त्तुरश्रुपर्याकुलेक्षणा ॥ ३३ ॥
गिरिशोऽपि विलोक्यास्याः शोकव्याकुलतां नृप ।
अब्रवीच्चां महासिंहो भूत्वा तिष्ठात्र कानने ॥ ३४ ॥

---

10. B स भूपतिः । 11. C corrected to धेनु पयस्विनी ।

बिभीषय गजान्मत्तान् यथा नैवं भवेत्पुनः ।
जन्तुं सम्मुखमायान्तमाहारं ते ददाम्यहम् ॥ ३५ ॥
इत्याज्ञां तस्य मूर्ध्नाहं मालामिव दधन्नृप ।
सिंहो भूत्वा चराम्येष त्रासनाय 12 हि दन्तिनाम् ॥ ३६ ॥
न ममाङ्गगतं 13 जन्तुं शक्नोपि हि विमोचयेत् ।
तदेनां नृप जानीहि प्राप्तकालां पयस्विनीम् ॥ ३७ ॥
नात्र व्रीडा त्वया कार्या भक्तिः सन्दर्शिता गुरौ ।
शस्त्रेरपि न यच्छक्यमकीर्त्तिर 14 धन्विनां न तत् ॥ ३८ ॥

राजोवाच—

सत्यमुक्तं त्वया सिंह वेत्सि चापि मनोगतम् ।
महेश्वरस्य भृत्योऽसि वाचा किन्ते निवेदये ॥ ३९ ॥
नियुक्तेयं वशिष्ठेन पालनार्थं तपस्विना ।
सोपेक्षणीया हि कथमक्षतेन मया हरे ॥ ४० ॥
मदीयेन शरीरेण स्वाहारमभिवर्त्तय ।
दिवावसान 15 क्षुधितवत्सामेनां विमुञ्च गाम् ॥ ४१ ॥

सिंह उवाच—

अनभिज्ञोऽसि राजेन्द्र धर्माधर्मे हिताहिते ।
जगतः पालकं देहं गवार्थे त्यक्तुमिच्छसि ॥ ४२ ॥
राज्यमेकातपत्रं ते जगत्यां जगतीपते ।
वयो नव्यं वपुश्चेदं देवानामिव सुन्दरम् ॥
एतत्सर्वं गवार्थे हि नभवांस्त्यक्तुमर्हति ॥ ४३ ॥
दयाजीवेषु चेदेवं तव राजन्नहोदिता 16 ।
तथापि न त्वं देहस्य त्यागमर्हसि सांप्रतम् ॥ ४४ ॥

---

12. A वायनाय । 13. C नवमाङ्गागतं । 14. A ०कीर्त्तिर्धन्विनां ।
15. A and B दिनावसान । 16. Read राजन्निहोदिता ?

जीवन् रक्षसि भूतानि बह्वनि मरणे पुनः ।
एकामेतां रक्षसि त्वं कोऽयं ते नृपते नयः ॥ ४५ ॥
बिभेषि चेद्गुरोस्तस्मादपराधविधानतः ।
गामेकां तदशक्यां वै 17 उपेक्ष्यास्त्वैरपि प्रभो ॥
धेनूः सहस्रशो दत्त्वा तोषणीयो वरं गुरुः ॥ ४६ ॥
दोहोऽयं सर्व्वधर्माणां साधनं परमं नृप ।
महीतलस्य राज्यन्तु वरमैन्द्र्यात्पदादपि ॥ ४७ ॥

राजोवाच—

यदियं भवताक्रान्ता कातरा मां निरीक्षते ।
साश्रुपातं ततः सिंह हृदयं दीर्यते मम ॥ ४८ ॥
क्षताक्षाणात् क्षत्रशब्दो विमुखस्य ततो मम ।
किं जीवनेन तत्सिंह कीर्त्तिलोपान्मृतिर्वरा ॥ ४९ ॥
धेनुर्दत्त्वा सहस्रं च न शक्यानुनयो मुनिः 18 ।
सुरभेः सदृशो सेयं 19 होमधेनुस्तपस्विनः ॥ ५० ॥
सेयं देहार्पणेनापि मोचनीया मयाधुना ।
तवापि पारणा सिद्धेन्न च लुम्पेन्मुनेः क्रिया ॥ ५१ ॥
भवानपि परं वेद भारं परवतां हरे ।
यदत्र देवदारौ ते प्राणान्तोपि परिश्रमः ॥ ५२ ॥
असता हि शरीरेण एकान्तपरिनाशिना 20 ।
अविनाशि यशः स्फीतं मूढो 21 नार्ज्जितुमिच्छति ॥ ५३ ॥
कृपालुर्भव तत्त्वं मे यशो देहि महत्तरम् ।
त्यजैनां मच्छरीरेण मृगेन्द्र कुरु पारणाम् 22 ॥ ५४ ॥

---

17. A तदशक्या ; B तदशक्यं वै ; C तदंशक्यां वै । 18. A धेनूर्दत्त्वा सहस्राय न शक्योनुनयो मुनिः । C धेनुं दत्त्वा सहस्रं च न शक्योनुनयो मुनिः ।

19. A and B चेयं । 20. B मृगेन्द्र कुरु पारणाम् । 21. A and B मुने ।

22. B omits verses 53a and 54.

तथास्त्वित्येव हरिणा भाषिते जगतीपतिः ।
धनुर्विहाय तस्याग्रे हसन्नुपविवेश ह ॥ ५५ ॥
अवाङ्मुखो नृपस्तस्थौ प्रार्थयन् पतनं हरेः ।
मुमुचुः पुष्पवर्षाणि विबुधास्तस्य मूर्धनि ॥ ५६ ॥
अथा23ल क्षितमागत्य नन्दिनी प्राह पार्थिवम् ।
उत्तिष्ठ वत्स सिद्धोऽसि प्रसन्नास्मि महीपते ॥ ५७ ॥
तत् श्रुत्वा वचनं तस्याः पीयूषमिव सम्भृतम् ।
नापश्यदुत्थितः सिंहं तामग्रेऽपश्यदास्थिताम् ॥ ५८ ॥
नन्दिनी तं पुनः प्राह वरं वरय भूमिप ।
मायेयं दर्शिता तुभ्यं तव भावबुभुत्सया ॥ ५९ ॥

राजोवाच—

सुतं मे देहि देवि त्वं सुरभोस्तत्सुतं सति ।
सैव त्वं देहभेदेन मत्कृपार्थमिहागता ॥ ६० ॥

नन्दिन्युवाच—

निहृत्ते 24 वत्सपानेच होमार्थञ्च तपस्विना ।
गृहीते च पयःशेषं दुग्ध्वा पर्णपुटे स्वयम् 25 ॥ ६१ ॥
पीत्वा सुदक्षिणायै तत्पीतशेषं प्रदास्यसि ।
भविष्यति कुमारस्ते वंशकर्त्ता महीपतिः ॥ ६२ ॥

शेष उवाच—

इति प्रसादमासाद्य दिलीपः पृथिवीपते 26 ।
सायं निहृत्तः सर्वंतत् वशिष्ठाय न्यवेदयत् ॥ ६३ ॥
प्रभाते तु ततो राजा तदुक्तं तत्तथाकरोत् ।
अथामन्त्र्य महात्मानं वशिष्ठं यमिनांवरम् ।
स्वं पुरं प्रययौ यानमारुह्य स्वगणैर्वृतः ॥ ६४ ॥

---

23. C तथा० । 24 C निर्हृत्ते । 25. A पत्रपुटे पयः । 26. Verse 63a. together with शेष उवाच, omitted by A.

तमागतमथालोक्य कृतकृत्यं महोपतिम् ।
पौरजानपदाः सर्वे परिवव्रुः समुत्सुकाः ॥ ६५ ॥
तान् सर्वान् स मामन्त्र्य पृष्ट्वा चानामयं पृथक् ।
प्रविवेश महाराजः प्रहृष्टः स्वं निवेशनम् ॥ ६६ ॥

॥ इति श्रीपद्मपुराणे पातालखण्डे सूर्यवंशकथने दिलीपवरलाभो नाम षष्ठोऽध्यायः ।

VIII

शेष उवाच—

मागधी तु ततः काले दिलीपाद्गर्भमादधे ।
मुदे प्रजानां सर्व्वासां प्राचीव शशिनं द्विज ॥ १ ॥
अथ काले महाराज्ञी शुभदे शुभलक्षणम् ।
सुषुवे चारुसर्वाङ्गं तारा बुधमिवात्मजम् ॥ २ ॥
दिशः प्रसेदुः प्रववौ चारुगन्धवहोनिलः ।
उच्चस्थाश्च ग्रहाः पञ्च जज्वलुस्वाग्नयः शुभाः ॥ ३ ॥
स जातो लघयन् यस्मात्तेजांसि रिपुभूभुजाम् ।
तेन नाम्ना रघुः प्रोक्तः प्रजानां प्रियदर्शनः ॥ ४ ॥
सुमुदे तेन पुत्रेण दिलीपोऽथ सुदक्षिणा ।
इन्द्रेणेवादितिर्ब्रह्मन् शुभलक्षणशालिना ॥ ५ ॥
शैशवे सोऽभ्यसद्विद्यां गुरोर्नियमितेन्द्रियः ।
प्राप्तसंस्कारविभवोऽप्युवाह नृपकन्यकाः ॥
चतस्रः सुभगा रूपैरप्सरःप्रतिमा रघुः ॥ ६ ॥
तं प्राप्तयौवनं दृष्ट्वा वेदवेदाङ्गपारगम् ।
निष्ठितञ्च धनुर्वेदे युवराजमथाकरोत् ॥ ७ ॥
अथ वीक्ष्य महावाहुं सर्व्वत्र विजयावहम् ।
नियुज्य वाजिरक्षायां बहुभीराजसूनुभिः ।
एकोनन्तु शतं चक्रे वाजिमेधान्महीपतिः ॥ ८ ॥
दिलीपस्तु वाजिमेधान् शतं तच्चरमेण वै ।
समापयितुमारेभे रघौ न्यस्य तुरङ्गमम् ॥ ९ ॥

---

1. C omits 2b.

स राजपुत्रै र्बंधुभिर्वाजिरत्नां सहाकरोत् ।
शक्रस्तु तदभिश्रुत्य राज्ञः कर्मातिशायनम् 2 ।
हयं जहार मेधावी स्वपद 3 च्युतिशङ्कया ॥ १० ॥
अलक्षितो जहाराश्वं मायया गूढविग्रहः ।
महेन्द्रः परितापेन मानसेन समन्वितः ॥ ११ ॥
कुमारस्य ततः सैन्यमदृष्ट्वा तच्च वाजिनम् ।
रघुं विज्ञापयामास हयः कस्मान्न दृश्यते ।
राजपुत्राश्च ते सर्व्वे विषण्णा अवतस्थिरे ॥ १२ ॥
रघुश्च धनुरादाय बाणान् सन्धाय दारुणान् ।
नापश्यद्धयहर्त्तारं विषसाद द्विजर्षभ ॥ १३ ॥
एतस्मिन्नेव काले तु नन्दिनी सा यदृच्छया 4 ।
रघोः सकाशमापेदे श्रुतपूर्व्वा श्रवत्स्तनी ॥ १४ ॥
रघुस्तदङ्गनिष्यन्दिजलेन बलिनां वरः ।
चकार नयने धौते ततोऽपश्यत्पुरन्दरम् ॥ १५ ॥
हरन्तं व्योममार्गेण वाजिमेधस्य तं हयम् ।
वार्य्यमाणं सारथिना मा कार्षीः साहसं रघौ ॥ १६ ॥
सहस्रलोचनैश्चिक्षैर्विदित्वा 5 तं पुरन्दरम् ।
दिलीपनन्दनो वाचमुवाच गर्व्वगर्भिताम् ॥ १७ ॥
प्रथमस्त्वं मखभुजां धर्मसेतुप्रवर्त्तकः ।
अजस्रार्जितधर्मस्य त्वधर्माद्विरतस्य च ॥ १८ ॥
वेदवेदाङ्गविज्ञस्य देवब्राह्मण सेविनः ।
मखैः सेवयतो 6 नित्यं युष्मानेव समाहितैः ।
कथमश्वं पितुः शक्र हरसे दुष्कृती यथा ॥ १९ ॥

---

2. C कर्मांभिशायनम् । 3. A °पाद । 4. A. not eligible. 5. B सहस्रेन्द्रीचने ; सहस्रेक्षीचनैश्चिन्हैः । 6. C पूजयतो ।

यूयं धर्मोपदेष्टारो 7 जगतां पालने स्थिताः ।
आचरेत यदाधर्मं कं यायात् शरणं प्रजा ॥ २० ॥
तदेतं बाजिनं देव पितुर्धर्मस्य साधनम् ।
प्रतिमुच्य प्रयाहि त्वं मा धर्मं द्रोग्धुमर्हसि ॥ २१ ॥

इन्द्र उवाच—

भो भो दिलीपपुत्र त्वं यथात्थ सर्व्वमेव तत् ।
उचितं सर्वदेवेषु विशेषः श्रूयतां मम ॥ २२ ॥
शतक्रतुरयं शब्दो मामेव भजतेऽनघ ।
ऐन्द्रं पदं ममैवेति द्वितीयं नैव युज्यते ॥ २३ ॥
कीर्त्तिर्मे रक्षणीया हि कीर्त्तिलोपो विगर्हितः ।
शतं क्रतूनां पित्वा ते क्षते मे लोप्यते यशः ॥
शक्रो द्वितीयः सम्पद्येत्सोढव्यं तत्कथं मया ॥ २४ ॥
तमब्रवीद्रघुर्वीरो मयि जीवति तद्भवान् ।
न शक्नोति हयं हर्त्तुं गृह्णाणास्त्रं पुरन्दर ॥ २५ ॥
इत्युक्त्वा धनुरादाय सज्यं कृत्वा च तत्क्षणात् ।
विभेद दशभिर्बाणैरूर्द्ध्वगैस्त्रिदशेश्वरम् ॥ २६ ॥
अधोमुखैस्ततो बाणैः शक्रोपि निजघान तम् ।
चिच्छेद तान् शरान् वीरो लघुहस्तो रघुः क्रतौ ॥ २७ ॥
एवमूर्द्ध्वमुखैर्बाणैः समुत्कीर्णैर्महाबलः ।
युयुधे स महेन्द्रेण स युयुधे त्वधोमुखैः ॥ २८ ॥
रघुर्बाणसहस्रेण सरथं त्रिदशेश्वरम् ।
छादयामास दीप्तेन बिभाय च पुरन्दरः ॥ २९ ॥
व्यग्रः स वज्रमादाय तं जघान रघुं क्रुधा ।
स पपात महीपृष्ठे निहतो गिरिशृङ्गवत् ॥ ३० ॥

---

7. B धर्मस्य देष्टारो।

उत्तस्थौ च महावीर्यः क्षणेन प्राप्तचेतनः ।
यथा न पतनं तस्य ज्ञातवान् बलसूदनः 8 ॥ ३१ ॥
दृष्ट्वा त्वमानुषं तस्य 9 विक्रमं त्रिदशाधिपः ।
विस्मयाय परं विप्र बिभेति स्म पुरन्दरः ॥ ३२ ॥
तथैव चापे विनियोज्य सायकं
विच्छेद शक्रस्य शरेण शिञ्जिनीम् 10 ।
तद्वीक्ष्य तस्यातिशयं पराक्रमं
तुतोष शक्रोऽथ जगाद तं वचः ॥ ३३ ॥
पक्षच्छिदा येन मया न्यधायि
रघो गिरीणामपि सारभाजाम् ।
सोढं त्वया यन्मम वज्रमेतत्
तेनासि वीरेषु वरो मतो मे ॥ ३४ ॥
तुष्टोऽस्मि युद्धेन च राजपुत्र
वरं वृणीष्व त्वमृते तुरङ्गमात् ।
शतक्रतुत्वं मम पूर्व्वजुष्टं
न हन्तु मिच्छे हि 11 कदाचनापि ॥ ३५ ॥
श्रुत्वा वचस्तस्य महाबलोऽसौ
चापे नियुक्तं प्रतिमुच्य बाणम् ।
दिलीपसूमुत्त्रिदशाधिनाथं
सुगर्व्वितां वाचमिमामुवाच ॥ ३६ ॥
शतं यदेकोनमभूत्क्रतूनां
तुरङ्गमेधास्तत एव तस्य ।
फलं क्रतूनां तु शतस्य पूर्णं
महेन्द्र ते तद्भवतु प्रसादात् ॥ ३७ ॥

---

8. B omits 31b. 9. A and B रूपं। 10. B शिञ्जिनीम्।
11. A •द्धि।

वार्त्तां तदैतां 12 न पितुर्व्वदेऽहं
तवैव सन्देशहरो ब्रवीतु ॥
ततोऽन्यथा चेन्न रघोः सकाशात्
न प्राणवान् यास्यसि देवराज ॥ ३८ ॥
तथा प्रतिश्रुत्य ययौ महेन्द्रो
रघुः समीपं पितुराजगाम ।
तदागमात् पूर्वमपि दिलीपः
शुश्राव वार्त्तां विबुधेन्द्रदूतात् ॥ ३९ ॥
ततो ह्यनन्दत्तनयं दिलीपः
फलं क्रतूनां शतकस्य लब्ध्वा ।
अरण्यमाश्रित्य समाधिनासौ
महेन्द्रलोके वसतिं चकार ॥ ४० ॥

॥ इति श्रीपद्मपुराणे पातालखण्डे सूर्यवंशकथने रघुविजयो
नाम सप्तमोऽध्यायः ॥

VIII

शेष उवाच—

रघौ राज्यमनुप्राप्ते राजानश्च 1 समन्ततः ।
तं मेनिरे प्रतापेन ज्वलन्तमिव पावकम् ॥ १ ॥
प्रजा मुमुदिरे सर्व्वा रघुं दृष्ट्वा महाबलम् ।
मन्त्रिणश्च तथामात्या अधिकं सिषेविरे ॥ २ ॥
अथ दिग्विजयायासौ प्रतस्थे स्वबलैर्वृतः ।
लिलिन्धुर्2 रथवः सर्वे दिगन्तमपि भेजिरे ॥ ३ ॥
दूरतोभ्येत्य राजानो नानोपायनपाणयः ।
सिषेविरे तं राजानं निवेद्य च करं द्विज ।
करदत्वं चकारासौ सर्वेषामेव भूभुजाम् ॥ ४ ॥
पूर्व्वं समुद्रमासाद्य जित्वा च सकलान्नृपान् ।
निचखान जयस्तम्भं सिन्धुमध्ये महाबलः ॥ ५ ॥
पश्चिमां तथा जित्वा दक्षिणामुत्तरां तथा ? ।
निचखान जयस्तम्भान् स्वनामपरिचिह्नितान् ॥ ६ ॥
प्रणताश्च नृपाः सर्व्वे रघौ तस्मिन्महीपतौ 3 ।
नाधर्मशब्दस्तत्रासीच्चतुष्पादभवद्वृषः ॥ ७ ॥
नाकालमृत्युस्तत्रासीत्कामधुग्धरणी भवत् ।
द्विजाश्वासन्निरुद्विग्ना रघौ राज्यं प्रशासति ॥ ८ ॥
राजानः करमाहुस्तस्मै सर्वे समन्ततः ।
रत्नानां राशिभिर्नासीदवकाशोऽस्य पत्तने ॥ ९ ॥
यत्र तत्र स्थितानाञ्च राशीनां द्विज सम्पदाम् ।
कीटोऽपि न क्षमः स्पर्शे कुतोऽन्ये तस्करादयः ॥ १० ॥

---

1. C राजानोऽन्ये । 2. B लिलिन्धु । 3. A omits 7a.

तेषां विभवराशीनां सत्पात्रप्रतिपत्तये ।
यज्ञं विश्वजितं नाम समारेभे महीपतिः ॥ ११ ॥
यज्ञे तस्मिन् वै राजानो ग्विदिग्भवाः ।
उपायनानि विविधान्याजह्रू राघवे मृगम् ॥ १२ ॥
मुनयस्तत्र विद्वांसो वशिष्ठप्रमुखा रघुम् ।
विधिवद्याजयामासुरङ्गप्रत्यङ्गकल्पनैः ।
देवास्तृप्तिं परां जग्मुर्हविषा सम्भृतेन वै ॥ १३ ॥
दीयतां भुज्यतां नादो विरराम न तत्पुरे ।
न दरिद्रस्तदा कश्चित् रघौ यज्ञं प्रकुर्वति ॥ १४ ॥
धनानां राशयो ये तु यावदिच्छं नियोजिताः ।
जगृहुः सर्वतोऽभ्येत्य यथेष्टं याचकास्तु तान् ॥ १५ ॥
दक्षिणाभिस्ततो विप्रान् पूजयामास भूपतिः ।4
अवशिष्टास्तृचदण्डचामरा एव केवलम् ॥ १६ ॥
अथावभृथमाप्लाव्य द्विजान् प्रस्थाप्य भूपतिः5 ।
मन्त्रिभिः सह धर्मज्ञः सभायां न्यवसद्द्विज ॥ १७ ॥
एतस्मिन्नन्तरे विप्र कौत्सो नाम महातपाः ।
वरतन्तोर्मुनेः शिष्यो वेदपाठं समापयत् ॥ १८ ॥
स गुरुं छन्दयामास दक्षिणाग्रहणाय च ।
गुरुस्तमाह तुष्टोऽस्मि तेनाहं प्राप्तदक्षिणः ॥ १९ ॥
प्राप्तविद्योऽसि सिद्धोऽसि क्रिया वेदोदिताः कुरु ।
प्रचारयतु विद्यास्ताः शिष्यैः संपाठितैर्भवान् ॥ २० ॥
शिष्यस्तमाह भगवन् गृह्यतां दक्षिणा किल ।
अदक्षिणो वेदपाठो न फलाय प्रकल्पते ॥ २१ ॥

---

4. After 16a C reads सर्वस्वं प्रददौ तत्र दक्षिणार्थं द्विजर्षभ ।
5. A omits 16b and 17a.

इति भूयश्चकारासौ निर्ब्बन्धं तं गुरुं प्रति ।
निस्पृहोऽपि गुरुस्तस्मै वरतन्तुश्चुकोप ह ॥ २२ ॥
तमाह यदि निर्ब्बन्धो दक्षिणार्थं तवाति6 भोः7 ।
देहि विद्यासमा हेम्नां विप्र कोटीश्चतुर्दश ।
तदा ते दक्षिणा सिद्धेत् पाठश्च सफलो भवेत् ॥ २३ ॥
कौत्सस्तु तदुपश्रुत्य गुरोर्वचनमुद्धतम् ।
चिन्तयामास मनसा हेमकोट्यः कुतो मया ।
चतुर्दश हि लब्धव्याः किं कृते मम किं भवेत् ॥ २४ ॥
एवं वदान्यः को वात्र वदान्यस्यापि कस्य वा ।
तावन्ति सन्ति रिक्थानि यावद्भिर्गुरुदक्षिणा ॥ २५ ॥
एवं चिन्तापरो विप्रो निश्चिकाय रघुं ततः ।
वदान्यत्वर्क्थ सम्पत्त्या सम्भाव्य गुरुदक्षिणाम् ॥ २६ ॥
तं जगाम ततो विप्र दक्षिणार्थी गुरोः कृते ।
सभायां नृपतिं प्राप प्रजानां हितकारिणम् ॥ २७ ॥
तमागतमभिप्रेत्य प्रीतियुक्तो महीपतिः ।
मृण्मयेन तु पात्रेण पाद्यमादाय चाभ्यगात् ॥ २८ ॥
ऊर्द्धं च मृण्मये पात्रे विधाय विहिताञ्जलिः ।
न्यवेदयन्महाभाग कौत्साय विधिवद्विज ॥ २९ ॥
दृष्टासने च संवेश्य तं मुनिं जगतीपतिः ।
पप्रच्छ कुशलं तस्य वरन्तोर्गुरोः किल ॥ ३० ॥

रघुरुवाच—

तपोवनेषु सर्वेषु फलमूलानि योगिनाम् ।
आहारार्थं समृद्धानि जायन्तेऽपि तपोधन ॥ ३१ ॥
नीवाराश्च प्रजायन्ते श्यामाकाः सन्ति सिद्धये ।
सुलभानि समिद्गर्भदृषतोयानि मारिष ॥ ३२ ॥

---

6. A and B तवास्ति । 7. Emendation. All the mss read भो ।

दस्युभ्यो वाथ चौरेभ्यो राजसेभ्यस्तपोधन ।
न भयं बाधते कञ्चिन्नाकालमरणादपि ॥ ३३ ॥
दर्शनेन कृतार्थोऽस्मि लब्धविद्यस्य ते मुने ।
इदानीं सदृशीं भार्यां लब्ध्वा गार्हस्थ्यमाचर ॥ ३४ ॥
अथवा नेदृशः प्रश्नो युष्मासु मम युज्यते ।
तपसा भवतां विप्र किमसाध्यं[8] जगत्त्रये ॥ ३५ ॥
तवागमनमेतत्तु कृतार्थयितुमेव नः[9] (?) ।
तथापि विनियोगार्हं मां नियोगेन वर्द्धय ॥ ३६ ॥
इत्युक्तवति राजेन्द्रे कौत्सः स मुनिसत्तमः ।
मृत्पात्रदर्शनध्वस्तमनोरथसमुन्नतिः ।
प्रत्याह तं महाराजं सर्व्वत्र कुशलं गुरौ ॥ ३७ ॥
त्वत्प्रतापपराक्रान्ते समस्तेऽस्मिन्महीतले ।
भयं नाम कथं वार्त्ता प्रवर्त्तेत द्विजन्मनाम् ॥ ३८ ॥
अकृष्टपच्या पृथिवी धर्मेण तव संभृता ।
प्रसूते फलमूलानि नीवारांश्च निरन्तरम् ॥ ३९ ॥
आगतोऽहं महाराज दक्षिणार्थी गुरोः कृते ।
मृत्पात्रेणैव शेषेण तव दृष्टेन सम्प्रति ।
निरस्तोऽहं गमिष्यामि स्वस्त्यस्तु तव भूपते ॥ ४० ॥
इत्युक्ता मुनिरुत्तस्थौ नृपस्तं प्राह चोत्थितम् ।
उपविश्य पुनर्ब्रूहि दक्षिणा का गुरोस्तव ॥ ४१ ॥

मुनिरुवाच—

किं श्रुतेन त्वया राजन् दक्षिणार्थेन धार्मिक ।
तवाशक्यमिति ज्ञातं मृत्पात्रेणैव ते नृप ॥ ४२ ॥

8, A केन साध्यं । 9. The text is not clear ; A reads कृतार्थयि॰ देवनः ।

तथापि तव निर्व्वन्धं श्रुत्वा वक्ष्यामि सम्प्रति ।
न प्रतिश्रावयामि त्वां तदशक्यं महीपते ॥ ४३ ॥
पुनः पुनर्वारितोपि गुरुणा दक्षिणामहम् ।
दातुकामोऽथ निर्व्वन्धमकार्षं विधिमोहितः ॥ ४४ ॥
ततो गुरुरवोचन्मां दक्षिणां प्रतिपादय ।
विद्यानां मम संख्याता हेम्नः कोटीश्चतुर्दश ॥ ४५ ॥
तदर्थमहमायातो ज्ञात्वा तव वदान्यताम् ।
न जानामि भवन्तं हि मखे सर्वस्वदक्षिणम् ॥ ४६ ॥
सोऽहं राजेन्द्र गच्छामि दृष्ट्वा तव दरिद्रताम् ।
उद्वेगं10 मा कृथास्त्वं हि न तत् शक्यं भवादृशा ॥ ४७ ॥

रघुरुवाच—

यदि यास्यसि विप्र त्वं मत्तोऽप्राप्तमनोरथः ।
सत्कीर्त्ति11 दीपिका सेयं ततो निर्व्वाणमेष्यति ॥ ४८ ॥
न याहि तिष्ठ विप्रेन्द्र रात्रिमेतां ममालये ।
श्वो दास्यामि तव प्रार्थ्यं धनं मा खेदमावह ॥ ४९ ॥
इत्युक्त्वा वासयामास तं मुनिं नृपसत्तमः ।
चिन्तयामास स तदा ब्राह्मणस्यार्थसाधनम् ॥ ५० ॥
सायं चकार सैन्यानां स्कन्धावारं महीपतिः ।
सारथीनादिदेशाथ रथानां योजनाय वै ॥ ५१ ॥
श्वो यास्यामि धनाध्यक्षं जेतुं कैलासपर्व्वतम् ।
इति संघोषयामास जगत्यां जगतीपतिः ॥ ५२ ॥
अधिवासं चकारापि शस्त्राणां धनुषामथा ।
हयानाञ्च गजानाञ्च नानावाद्यान्यवीवदत् ॥ ५३ ॥
तदायोधनवृत्तान्तं नारदो धनदाय वै ।
प्रापयामास सकलं स भीतो मुनिमब्रवीत् ॥ ५४ ॥

---

10. A उद्वेगं । 11. C सत्कीर्त्ति ।

वज्रेणापि महेन्द्रेण जेतुं शक्यो न भूपतिः ।
तस्मान्न तेन संग्रामः क्षेमाय परिकल्पते12 ।
तदत्र कथय त्वं मे यथा नायान्महीपतिः ॥ ५५ ॥
तमाह नारदो वाक्यं कुबेर शृणु मे वचः ।
अर्थाकाङ्क्षी रघुः सोऽद्य कौत्सयाच्ञावशीकृतः ॥ ५६ ॥
तदस्य भवने हेम्नां रत्नानां च महीयसाम् ।
विधेहि वर्षं 13 त्वरितं तोयानां जलदो यथा ॥ ५८ ॥
तच्छ्रुत्वा धनदः प्राह यक्षाननुचरान्बहून् ।
हेम्नां वर्षत राज्ञोऽद्य रघोरन्तःपुरे बहून् । 14
वव्रषुस्ते ततो हेम्नां राज्ञोनन्तःपुरे रघोः ॥ ५८ ॥
राजा तु प्रातरुत्थाय हेमराशीन्ददर्श ह ।
धनदप्रेषितान् ज्ञात्वा मुमुदे ऽतितरां द्विज ॥ ५९ ॥
अथ कौत्सं समाहूय मुनिमाह महीपतिः ।
यावदिच्छं ग्रहाण त्वं हेमराशीन् गुरोः कृते ॥ ६० ॥
मुनिराह महाराज यथा ते प्रथितं यशः ।
तथैव भविता पुत्रो यथा त्वं त्वत्पितुः सुतः ।
अचिरादेव मे वाक्यात्त्वया सन्तोषितस्य वै ॥ ६१ ॥
न चतुर्दशकोटिभ्योऽभ्यधिकेन महीपते ।
कृत्यं मम महाराज धनं हि पदमापदाम् ॥ ६२ ॥
इति तस्माद्गृहीत्वा स धनानि मुनिसत्तमः ।
गुरवे दक्षिणां प्रादाद्रघोः कीर्त्तिं विवर्द्धयन् ॥ ६३ ॥

इति श्रीपद्मपुराणे पातालखण्डे कौत्सप्रतिग्रहो
ऽष्टमोऽध्यायः ॥

---

12. C reads परिकल्पयति corrected in the margin to कल्पयिष्यति ।
13. B वर्षां । 14. C reads एवमुक्त्वा यक्षगणाध्यक्षेण धीमता afters 58b.

IX

शेष उवाच—

राजपत्नी ततः काले सुषुवेऽप्रतिमं सुतम् ।
ब्राह्मे मुहूर्ते धर्मज्ञ तेन नाम्नाऽजोऽभवत् ॥ १ ॥
बाल एव महासत्त्वो लोकानां सुखमातनोत् ।
तं पितायोजयत् काले संस्कारे वेदपारगः ॥ २ ॥
सोऽपि वेदानथाध्येष्ट धनुर्वेदांश्च कृत्स्नशः ।
विद्याश्चतुर्दश प्राप कौत्सादेव ततो मुनेः ॥ ३ ॥
प्राप्तकैशोरके तस्मिन् रघोः पुत्रे महौजसि ।
विदर्भाधिपतेर्दूतः समागत्य न्यवेदयत् ॥ ४ ॥
दूतोऽहं भोजनाम्नो वै विदर्भाधिपतेर्नृप ।
प्रेषितस्तेन भूपाल पुत्राणां नयनाय वै ॥ ५ ॥
स्वसा तस्यानवद्याङ्गी नाम्ना चेन्दुमुखी शुभा ।
स्वयंवरे पतिं तन्वी ग्रहीष्यति मनोरमम् ॥ ६ ॥
निमन्त्रिताः कुमारा मे बहवो भूप भूभुजाम् ।
प्रयान्ति शतशः शीघ्रं त्वमपि प्रेषयात्मजम् ॥ ७ ॥
रघुस्तु तदुपश्रुत्य श्राद्धं वैवाहिकं विधिम् ।
तनयं प्रेषयामास ससैन्यमथ कुण्डिनम् ॥ ८ ॥
पथि तस्य ससैन्यस्य निवासाय महात्मनः ।
नियुक्ताः कल्पयाञ्चक्रुर्वस्त्रवेश्मानि भूरिशः ॥ ९ ॥
अजस्तु प्रस्थितो विप्र गजवाजिरथाकुलम् ।
सैन्यमादाय बलवान् सखिभिर्बलिभिः सह ॥ १० ॥

मध्याह्ने नर्मदायास्तु तीरे श्रमवशोकृतम् ।
सैन्यं संवेशयामास कुमारो वस्त्रवेश्मसु ॥ ११ ॥
अवतीर्य ततो यानादजः स्नानं चकार सः ।
नैत्यिकं साधयामास तत्र माध्याह्निकं जले ॥ १२ ॥
तद्देशस्य तु भूपालो युमान्नाम रघोः प्रियः ।
उपायनानि प्रादाद्वै भक्ष्यभोज्यानि मारिष ॥ १३ ॥
स सैन्यवाहनायैव रघोः प्रियचिकीर्षया ।
तत्सैन्यं तत्र सुमहद् भुक्त्वा पीत्वा च सुस्थितम् ॥ १४ ॥
आलानेषु गजान् बद्ध्वा मदमत्तान् गिरिप्रभान् ।
अश्वांश्च संनियम्याथ सुष्वाप शयने निशि ॥ १५ ॥
अथ कश्चित्करो बन्धो विहरन् गहने वने ।
जगाहे नर्मदां विप्र महापर्वतसन्निभः ॥ १६ ॥
ख्यातस्तत्र वने हस्ती न बध्यो भूभृतामिति ।
बहवोऽपि पुरा राजपुत्रास्तेन हताः किल ॥ १७ ॥
विहरन्नर्मदायां स करिणीगणवेष्टितः ।
करेण तोयमुद्धृत्य सिषेच करिणीर्भृशम् ॥ १८ ॥
उत्क्षिपन्नर्मदामध्यात्तरङ्गान् स महाबलः ।
पाटयामास बहुशस्तटजातान् महीरुहान् ॥ १९ ॥
अथोत्तिष्ठन् जलात्तस्मात् करिणीभिः सह द्विपः ।
वन्येतराणां स प्राप गन्धं तत्सैन्यदन्तिनाम् ॥ २० ॥
ततः क्रुद्धो महादन्ती तत्सैन्यं पर्यलोडयत् ।
द्विपास्त्वालानमुत्पाट्य दुद्रुवुश्च समन्ततः ॥ २१ ॥
तुरङ्गाः परित्रस्ता विक्रमैश्छिन्नरश्मयः ।
उष्ट्राश्च दुद्रुवुर्विप्र चिल्कारे[1]श्छिन्नबन्धनाः ॥ २२ ॥
यत्नेनापि न यन्तारो निरोद्धुमभवन् क्षमाः ।
योधाश्च भीताः शस्त्राणि मुमुचुस्तत्र भूरिशः ॥ २३ ॥

1. Read चौल्कारे० (?)

न तानि गणयामास वनहस्ती न विव्यथे ।
समन्तात्क्षोभयामास तत्सैन्यमतिभीषणः ॥ २४ ॥
तद्दृष्ट्वा तु कुमारोऽथ रघुपुत्रो महाबलः ।
सज्यं कृत्वा धनुर्बाणं सन्दधे ज्वलनोपमम् ।
तेन दन्तावलं तं च कुम्भमध्ये जघान ह ॥ २५ ॥
स विद्धमाचस्खलिवा नागरूपं श्रिया ज्वलन् ।
अवाप रूपं गान्धर्व्वं मुक्ताहारविभूषितम् ॥ २६ ॥
अजस्रं परिपप्रच्छ कस्त्वं केनासि नागताम् ।
प्राप्तस्तद्वद केनाथ दिव्यरूपमवाप्तवान् ॥ २७ ॥

गन्धर्व्व उवाच—

आसम्पुरा महाबाहो गन्धर्व्वोऽहं प्रियंवदः ।
सुतो गन्धर्व्वाधिपतेः प्रियदर्शनसंज्ञिनः ॥ २८ ॥
मतङ्गस्य मुनेः शापान्नर्वादवमतस्य वै ॥
नागत्वमगमं वीर त्वत्प्रसादेन मोचितः ॥ २९ ॥
पश्चात्प्रसादितेनैव मुनिना तेन मानद ।
शापान्तोऽपि कृतो यस्तु तं ब्रवीमि महामते ॥ ३० ॥

मुनिरुवाच—

सूर्य्यवंशभवो राजा रघोः पुत्रो महाबलः ।
अजो नाम यदा कुम्भं बाणैस्ते 2 प्रतिभेत्स्यति ।
तदा गन्धर्वरूपेण पुनः स्वर्गमवाप्स्यसि ॥ ३१ ॥

गन्धर्व्व उवाच—

सोऽहं शापादि 3 निर्मुक्तः प्रसादात्तव सम्प्रति ।
गमिष्यामि निजं स्थानं स्वस्त्यस्तु तव भूपते ॥ ३२ ॥

---

2. A and C °स्त । 3. B पापवि० ।

प्रतिप्रियं च ते राजन् करोम्यवहितो भव ।
विना प्रत्युपकारेण यदि यामि सुरालयम् ।
मत्तः 4 कृतघ्नः कोऽन्यस्तु ततः कुर्यां प्रतिप्रियम् ॥ ३३ ॥
मत्तः प्रस्वापनं नाम गृहाणास्त्रं नृपात्मज ।
सविसर्गसमाहारमन्त्रैः सह विशाम्यते ॥ ३४ ॥
येन शत्रून् जेष्यसि त्वं हिंसयापि विनानघ ।
विजयः सर्वदा तेऽस्तु न हिंसा च प्रवर्त्तताम् ॥ ३५ ॥
तन्निशम्य रघोः पुत्र उपस्पृश्य महामतिः ।
प्रत्यगृह्णात्तदस्त्रं वै सविसर्गोपसंहृति ॥ ३६ ॥
गन्धर्वराजस्तदत्वा प्रस्वापास्त्रं महीभुजे ।
जगाम स्वालयं विप्र प्रशंसंस्तनयं रघोः ॥ ३७ ॥
अथ प्रभाते सैन्यं तत्प्राप भोजपुरं द्विज ।
भोजस्तं वासयामास कल्पिते नव्यवेश्मनि ॥ ३८ ॥
नियोजयामास निजान् भृत्यांस्तं परिचर्यया ।
निषेवितुं ततो रात्रिं तां निनाय नृपात्मजः ॥ ३९ ॥

॥ इति श्रीपद्मपुराणे पातालखण्डे रघुचरिते[5]
नवमोऽध्यायः ॥

---

4. A and C मत्त । 5. A and C omit रघुचरिते ।

X

शेष उवाच—

अथ प्रभाते रघुराजपुत्रः
स्वयंवरस्थानमलञ्चकार ।
संस्तूयमानः किल वन्दिपुत्रैः
श्वेतातपत्रेण विशोभमानः ॥ १॥

स तत्र मञ्चं निजनामचिह्नं विचित्रसिंहासनसन्निवेशम् ।
समारुरोह क्षितिपालपुत्रो निरीक्ष्यमाणः परराजपुत्रैः ॥ २ ॥
तत्रोपविष्टेषु नृपात्मजेषु स्वयंवरं चेन्दुमतो प्रपेदे ।
विचित्रवस्त्राभरणावभाता देवोव रूपेण मनोहरेण ॥ ३ ॥
तां वीक्ष्य चञ्चलापाङ्गीं नीलकुञ्चितमूर्धजाम् ।
मङ्गलाभरणैर्युक्तां प्रतिमामिव शोभिताम् ॥ ४ ॥
राजपुत्राः समायाता युवानो रूपगर्विताः ।
मन्यमाना मनैवेयं महिषी वै भविष्यति ॥ ५ ॥
ततः सा यानमारुह्य क्रमेणैव नृपात्मजान् ।
विलोकयामास तन्वी रूपयौवनदर्पितान् ॥ ६ ॥
तेषां गोत्राणि नामानि यशांसि चरितानि च ।
तस्यै संवर्णयामास मन्त्री वृद्धः क्षमापतेः ॥ ७ ॥
व्यतीयाय ततो वीरान् बहूनपि नृपात्मजा ।
न सा मेने पतिं योग्यं तेषु भूपात्मजेषु च ॥ ८ ॥
ये चासन् विद्वतोत्कण्ठा इन्दुमत्यां नृपात्मजाः ।
अतिक्रम्य गतायान्तु व्रीडिता अभवन् द्विज ॥ ९ ॥

शेषा ये राजपुत्रास्तु तेष्वासन् भृशमुत्सुकाः ।
अवज्ञाता इमे तन्वङ्गी ममेयं तद्भविष्यति ॥ १० ॥
इति चिन्तयतस्तांश्च कुण्डिनेश्वरनन्दिनी ।
व्यतीयाय क्रमेणैव ते च व्रीडामुपाययुः ॥ ११ ॥
अथ मन्त्री ततो हृद्यो दर्शयामास राघवम् ।
वर्णयामास वंशं च चरितं च महायशाः ॥ १२ ॥
रूपञ्च सा ददर्शास्य मदनस्येव सुन्दरम् ।
अजमिन्दुमती मेने पतिं पद्मविलोचना ॥ १३ ॥
तस्य कण्ठे ततो मालां कुण्डिनेशसुता ददौ ।
मूर्ध्नि पुष्पाणि देवास्तु द्वयोरेवाप्यमूमुचन् ॥ १४ ॥
ऊचुश्च तत्पुरजना नार्यश्चापि समन्ततः ।
धन्या सेयं पतिं लब्धा धन्यमेव नृपात्मजा ॥ १५ ॥
यथैवेन्दुमती बाला रूपेणाप्सरसाधिका ।
तथैवायं सूर्यवंशप्रसूतो विबुधाधिकः ॥ १६ ॥
येन या योजनीया हि तज्जानाति[1] विधिः स्वयम् ।
तेन तां योजयत्येव न करोति विपर्ययम् ॥ १७ ॥
इत्येवं सर्वतो विप्र प्रशशंसुर्जनास्तदा[2] ।
दम्पती रङ्गमध्यस्थौ भोजः प्रीतिं परां ययौ ॥ १८ ॥
ततो वैवाहिकं लग्नं विधाय विधिवद्विज ।
भोज इन्दुमतीं प्रादादग्निसाक्षिककर्मणा ॥ १९ ॥
गृहीत्वा विधिवत्पाणिमजः परमधार्मिकः ।
तया सह महाभाग प्रतस्थे स्वपुराय वै ॥ २० ॥
भोजस्तु यौतुकं प्रादाद्रत्नस्वरथदासिकाः ।
सहस्रशो महाभाग दम्पती परिवर्तयन् ॥ २१ ॥

---

1. A. तज्ज्ञानी (ज्ञौ) ति । 2. A. (प्र) शशंसुर्जना मुदा ।

सैन्यञ्च पथि रक्षार्थं हस्त्यश्वरथपत्तिकम् ।
सह प्रस्थापयामास रघुपुत्रेण भूपतिः ॥ २२ ॥
प्रययौ स महाबाहुर्बहुमङ्गलभूषितः ।
अथ स्वयंवरप्राप्तव्रीडा ये नृपसूनवः ॥ २३ ॥
ते सर्व पृथगाहृत्य सैन्यानि बहुशो द्विज ।
रुरुधुस्तस्य पन्थानं नारीरत्नं जिघृक्षवः ॥ २४ ॥
तेषामापततां वेगं निशम्य रघुनन्दनः ।
स्वसैन्यं सज्जयामास विप्र सन्नहनादिभिः ॥ २५ ॥
ततः प्रववृते युद्धं तुमुलं लोमहर्षणम् ।
राघवस्य च सैन्यस्य तेषाञ्च द्विज भूभुजाम् ॥ २६ ॥
द्विपा द्विपैरसज्यन्त रथाश्च रथिभिः सह ।
हयारोहैर्हयारोहाः पादाताश्च पदातिभिः ॥ २७ ॥
मुषलैर्मुद्गरैर्वीरैरसिभिः पट्टिशैरपि[3] ।
पाशैः प्रासैश्च[4] शक्तयैश्च धनुर्मुक्तैर्महेषुभिः ॥ २८ ॥
शस्त्रपातैर्महाघोरैर्निजघ्नुस्ते परस्परम् ।
अशेरत ततो योधा बहवः शरविक्षताः ॥२९॥
अथ ते राजतनया मिलित्वा रघुनन्दनम् ।
निचिक्षिपुर्बहुभिर्बाणैश्छादयामासुरोजसा ॥ ३० ॥
अजोऽपि स महाबाहुश्छित्वा तं शरपञ्जरम् ।
इषुभिश्चापनिर्मुक्तैस्तान् विव्याध पृथक् पृथक् ॥ ३१ ॥
ते हतास्तस्य बाणेन भूपालतनयाः पृथक् [5] ।
सन्दधुः शतशो बाणानजप्राणजिहीर्षया ॥ ३२ ॥
तान् दृष्ट्वा नृपतीन् क्रुद्धान् बहूनेको महारथः[6] ।
गन्धर्वदत्तं बाणं तं सन्दधे रघुनन्दनः ॥ ३३ ॥

---

3. C. °रिषुभिः पट्टिशैरपि (?) 4. A and B. प्राशैश्च। 5. C omits 32a.
6. B. राज्ञां मोहाय सत्वरः for बहूनेको महारथः and then omits 33b and 34

मन्त्रेणामन्त्र्य तं बाणं प्रस्वापनममर्षणः ।
चिक्षेप विमलप्रज्ञो राज्ञां मोहाय सत्वरः ॥ ३४ ॥
प्रकाशमानो बाणोऽसौ क्षणेन व्यसृजत्तमः ।
लोचनेषु ततो राज्ञामान्ध्यं जज्ञे[7] द्विजर्षभ ॥ ३५ ॥
जृम्भमाणास्ततो भूपा नेत्रैर्मुकुलितै र्भृशम् ।
प्रस्वापमभजन् सर्वे दीर्घनिश्वासशालिनः ॥ ३६ ॥
शेरते स्म रथोपस्थेष्विन्द्रियेषु च्युतक्रियाः ।
गजपृष्ठे गजारोहा हयपृष्ठे च सादिनः ॥
पदातयो महीपृष्ठे सुषुपुर्भ्रष्टचेतनाः ॥ ३७ ॥
तान् सुप्तान् नृपतीन् दृष्ट्वावतीर्य स्वरथादजः ।
तेषां शस्त्राण्यथास्त्राणि जग्राह बलिनां वरः ॥ ३८ ॥
मुकुटेषु ततस्तेषां व्यलिखद्रघुनन्दनः ।
स्वनामचिन्हरेखाभी राजा विजयपत्रिकाम् ॥ ३९ ॥
न गृहीता मया प्राणा भवतां हि दयालुना ।
यशांस्येव गृहीतानि शस्त्राणि च निदर्शनम् ॥
विक्रमो दर्शितश्चायं घोषयध्वं जयो मम ॥ ४० ॥
इति चिन्हैः सूर्यवंशप्रभवानां कुलोचितैः ।
कलङ्कोक्त्य तान् राज्ञः प्रतस्थे स महाबलः ॥ ४१ ॥

॥ इति श्रीपद्मपुराणे पातालखण्डे सूर्यवंशकथनेऽजविजयो नाम दशमोऽध्यायः ॥

---

7. A and B जज्ञे

XI

शेष उवाच—

अथ दूतेन तां वार्त्तां श्रावितां[1] जगतोपतिः ।
निशम्य परमप्रीतः पुरशोभां समादिशत् ॥ १ ॥
रघोराज्ञां ततो लब्ध्वा नियुक्ताः पुरवासिनः ।
तोरणैः शोभयामासुः पुर[2]मुत्तरकोशलाम् ॥ २ ॥
पताकाभिः समृद्धाभो रत्नस्तम्भैश्च भूरिशः ।
सफलैः कदलीजालैः पूगपोतैश्च सर्वशः ॥ ३ ॥
रसालशाखापिहितैः पूर्णकुम्भैरलङ्कृतैः ।
आलेपनैश्च बहुधा गौरसर्षपलाजकैः ॥ ४ ॥
मालाभिश्च सुरम्याभिरलञ्चक्रे पुरीं तदा ।
चन्दनैः सिषिचुर्मार्गान् धूपांश्चैव न्ययोजयन् ॥ ५ ॥
वारमुख्याश्च शतशो वेशांश्चक्रुर्मनोरमान् ।
पुरनार्यः पुरन्ध्रयश्च चक्रुः कौतुकविस्तरम् ॥ ६ ॥
विभूषिता नरा नार्यः परिसस्मुरित[3]स्ततः ।
नाना वाद्यान्यवाद्यन्त पुरे तस्मिन् महोत्सवे ॥ ७ ॥
ततः सैन्येन महता वाद्यैश्च विविधैरपि ।
मत्तमातङ्गयूथैश्च मण्डितैः कम्बलादिभिः ॥ ८ ॥
तुरङ्गैरुत्पतद्भिश्च कूर्दमानैः पदातिभिः ।
रघुः प्रत्युद्ययौ प्रीतः सभार्यं तनयं प्रति ॥ ९ ॥
अजोऽपि पुरमापेदे जयं लब्ध्वा तु संगरे ।
लक्षितं जयचिन्हेन रघुस्तं परिषस्वजे ॥ १० ॥

---

1. C प्रापितां । 2. C पुरी० । 3. A and B ०स्तत० ।

अथ प्रावेशयद्राजा सभार्यं तनयं पुरम् ।
मुमुदे परया प्रीत्या सुतं ज्ञात्वा महाबलम् ॥ ११ ॥
ततो राज्येऽभिषिच्यैनं प्रजानां सम्मतं सुतम् ।
स्वयं प्रतस्थे विपिनं तपसे स महीपतिः ॥ १२ ॥
अजो राज्यं ततः प्राप्य पित्रा दत्तं महामतिः ।
प्रजानां पालनं चक्रे पितेव परमद्युतिः ॥ १३ ॥
जनयामास तस्यां स इन्दुमत्यां महाबलम्[4] ।
पुत्रं दशरथं नाम स्वर्वंशाभरणं द्विज ॥ १४ ॥
शशास विधिवद्राजा प्रजां धर्मेण रञ्जयन्[5] ।
ईजे च बहुभिर्यज्ञैर्नृपतिर्बहुदक्षिणैः ॥ १५ ॥
युवराजं ततः कृत्वा पुत्रं दशरथं नृपः ।
विजहार वने रम्ये इन्दुमत्या सह स्वयम् ॥ १६ ॥
ददर्श वनमध्यस्थो लता रम्या मनोहराः ।
अथ रोधसि पाथोधेर्दक्षिणे कृतकेतनम् ॥ १७ ॥
गोकर्णं तु महादेवमुपवीणयितुं मुनिः ।
नारदो व्योममार्गेण जगाम ब्राह्मणर्षभ ॥ १८ ॥
वल्लकीशिरसस्तस्य माला मन्दारनिर्मिता ।
वायुनापहृताकस्मात् पपात भ्रमरैः सह ॥ १९ ॥
सा माला पतिता तस्या इन्दुमत्या उरःस्थले[6] ।
ततस्तन्वी पपातोर्व्यां जहौ प्राणानपि क्षणात् ॥ २० ॥
अथ तां पतितां दृष्ट्वा नृपतिर्भृशमाकुलः[8] ।
भुजाभ्यामथ दोर्भ्यां समाश्लिष्याङ्कमानयत् ॥ २१ ॥

---

4. A and B महाबलः । 5. C reads राजा शशास विधिवत्प्रजा धर्मेण रञ्जयन् ।
6. A and C. उपस्थले ; B उपस्थले । Emendation. 7. C. तथा ।
8. B. सञ्ज्ञस्ताः समाकुलाः and then omits 21b and 22.

गतप्राणां विशालाक्षीं विलोक्योद्वेगमावहन् ।
मूर्च्छितो निपपातासौ धरण्यां धरणीपतिः ॥ २२ ॥
तथा तां पतितां दृष्ट्वा सख्यस्तस्याः समाकुलाः ।
राजानं चेतयामासुश्चामरोद्वीजनादिभिः ॥ २३ ॥
स प्राप चेतनां राजा परिचर्याभिरात्मवान् ।
विललाप महाभाग पातितैरश्रुविन्दुभिः ॥ २४ ॥

राजोवाच—

उत्तिष्ठ कान्ते किमिदं शेषे किन्नु महीतले ।
विलोकय पतिं पार्श्वे चञ्चलापाङ्गवीक्षितैः[9] ॥ २५ ॥
इमाः सख्यो महाभागे समन्तात्त्वां सुव्रते ।
त्वदाज्ञामभिकाङ्क्षन्ते प्रसादैः परिवर्धय ॥ २६ ॥
इदं ते सुमहद्राज्यं पतिश्चाहं प्रियंवदः ।
सुतो दशरथस्तन्वि महेन्द्रोपमविक्रमः ॥ २७ ॥
दास्यश्च परमोदाराः सेविकास्तव सर्वदा ।
एतत्सर्वमनादृत्य प्रिये स्वपिषि किंशुभे ॥ २८ ॥
आश्चर्यमिदमेतत्तु यन्माला सुरपुष्पजा ।
जहार तन्वि ते प्राणानहो वञ्चयिता सति ॥ २९ ॥
यदि प्राणहरा चेयं माला मन्दारपुष्पजा ।
न प्राणान् हरते कस्मादर्पिता मम वक्षसि ॥ ३० ॥
इत्थं विलपमानं तं दृष्ट्वा दास्यः शुचान्विताः ।
अप्रापयन्त तां वार्त्तां युवराजं सभाखितम् ॥ ३१ ॥
तत आगत्य विरुदन् युवराजो वनान्तरम् ।
ददर्श मातरं तत्र गतासुं पतितां भुवि ॥ ३२ ॥

---

9. A and B. °रिक्षितैः ।

नृपञ्च पतितं दृष्ट्वा विलपन्तं महीतले ।
रुदित्वा बन्धुभिश्चक्रे मातुरन्त्यादृतिक्रियाम् ॥ ३३ ॥
पितरं सान्त्वयित्वाथ निनाय स्वपुरं सुतः ।
क्रिया वेदोदिता10श्चक्रे मातुर्दशरथः स्वयम् ॥ ३४ ॥
अजस्त्विन्दुमतीशोकात्परमामाप वेदनाम् ।
नैकत्र वसते राजा न भुंक्ते न पिबत्यपः ॥ ३५ ॥
न क्षेपयति गन्धेन न शय्यायामथास्वपत् ।
न सभां प्राविशत्काले नापृच्छत् पौरकृत्यताम् ।
नामन्त्रयत्कान्तिभिश्च न राज्यं समवैक्षत ॥ ३६ ॥
तद्विज्ञाय वशिष्ठस्तु सर्वं दिव्येन चक्षुषा ।
शिष्यं प्रस्थापयामास प्रबोधाय नृपस्य वै ॥ ३७ ॥
स शिष्यः सुतपा नाम नृपमागत्य काननात् ।
विलपन्तं जगादेदं रहसि प्रतिपादयन् ॥ ३८ ॥
कथं शोचसि राजेन्द्र जातो मनुकुलेऽपि सन् ।
पृथग्जन इव प्राज्ञमवधीर्यं स्वभावजाम् ॥ ३९ ॥
गुरुर्विज्ञाय भवतो भार्याविरहदुःखिताम् ।
प्राख्यापयत्प्रबोधाय मन्मुखेन वचांसि ते ॥ ४० ॥
असमाप्तक्रियः स त्वां स्वयं नायाति भूमिप ।
शृणु तद्वचनं मत्तः श्रुत्वा समवधारय ॥ ४१ ॥
या पाणिग्रहीतो राजन् राज्ञां भार्या सुलोचना ।
न सा भार्या महाराज्ञ पत्नी यज्ञसुधैव हि ॥ ४२ ॥
तथाहि नोक्तपूर्वं लोके क्वचिदिन्दुमतीपतिः ।
महीपतिरयं शब्दस्तव सर्वत्र गीयते ॥ ४३ ॥
भवद्विधा महाभागा वेदवेदाङ्गपारगाः ।
नैव शोचितुमर्हन्ति धर्म्यामर्हन्ति सत्क्रियाम् ॥ ४४ ॥

---

10. B. •सदुचिता• ।

मानुष्ये कदलीस्तम्भे निःसारे सारमार्गणम् ।
यः करोति स संमूढो जलबुद्बुदसंनिभे ॥ ४५ ॥
क्व गताः पितरो राजन् क्व गतास्ते पितामहाः ।
मरणं प्राणिनां नित्यं ततः किमनुशोचसि ॥ ४६ ॥
विवस्वतः कुले जन्म ख्यातस्त्वं तनयो रघोः ।
राज्यमब्धिपर्यन्तं सर्वं हि सुमहत्तव11 ॥ ४७ ॥
अयञ्च पत्नीशोकस्ते न कर्तव्यो महीपते ।
वृत्तान्तमस्यास्ते पूर्वं कथयेऽहं शृणु प्रभो ॥ ४८ ॥
तृणविन्दोः पुरा राजन् तपतः परमं तपः ।
शङ्कितः सुरराट् चक्रे तपोविघ्नार्थमुद्यमम् ॥ ४९ ॥
आहूयाप्सरसं नाम्ना हरिणीं हरिणेक्षणाम् ।
प्रेषयामास तपसश्छिद्राय तस्य तप्यतः ॥ ५० ॥
सा तु गत्वाश्रमं तस्य तृणविन्दोर्महामुनेः ।
विजहार विनृत्यन्ती चारुरूपविलासिनी ।
ननर्त च सुहाराख्या12 भूषणानि व्यधिज्वयत्13 ॥ ५१ ॥
स तपःप्रतिबन्धं तां विलोक्य14 पुरतः स्थिताम् ।
रुषा शशाप दुष्टे त्वं मानुषी न चिराद्भव ॥ ५२ ॥
सा शप्ता15 वेपमाना तं प्रासादयदनिन्दिता ।
शापान्तं कुरु मे साधो सदा परवशाह्यहम् ॥ ५३ ॥
स प्रसन्नोऽब्रवीद्देवि क्रथके16ऽस्मिकवंशजा ।
भूत्वा चेन्दुमती नाम रूपेणाप्रतिमा भुवि ॥
अजं नाम पतिं लब्धा राज्यं भोक्ष्यसि सम्मतम् ॥ ५४ ॥
देवप्रसूनरचितां यावन्मालां न पश्यसि ।
तावत्ते मानुषोभावस्ततो देवी भविष्यसि17 ॥ ५५ ॥

---

11. A and C सुमहत्तर । 12. A. सुहाराद्या । 13. B. व्यधिज्वयत् ; C. व्यधिज्वयत् । 14. A. ०बन्धां तां विलोप्य । 15. A. सा शप्त्वा ; B. सा शप्ता । 16. B. क्रोथकैशिक ; C. क्रथकैशिक । 17. C. omits 55b.

शापान्तकारणं तस्या माल्यं यत्सुरपुष्पजम् ।
तदासाद्य जहौ प्राणान् साभूद्देवी दिवं गता ॥ ५६ ॥
त्वं यथा चेष्टवान् यज्ञे र्विविधैर्भूरिदक्षिणैः ।
तत्कान्त्याधिका देव्यो वरयिष्यन्ति भूमिप ॥ ५७ ॥
भवन्तं स्वर्गलोके वै नेमां शोचस्व भूपते ।
न शोकेन विलापेन सा पुनः प्रतिवर्त्स्यते18 ॥ ५८ ॥
इति प्रबोध्य तं शिष्यो वशिष्ठस्य ययौ पुनः19 ।
राजापि स्वसुतन्यस्तराज्यभारो वनं ययौ ॥ ५९ ॥
सरयूगङ्गयोर्वेण्यां काले स्वक्ता कलेवरम् ।
स्वर्गत्वा तां प्रियां कान्तामपराश्च ततोऽधिकाः ।
प्राप्य सोऽप्सरसो रेमे महेन्द्र इव ऋद्धिमान् ॥ ६० ॥

॥ इति श्रीपद्मपुराणे पातालखण्डे सूर्यवंशकथनेऽजस्वर्गारोहणं नाम एकादशोऽध्यायः ॥

---

18. A and B. प्रतिवर्त्स्यति। 19. C. मुनेः।

XII

शेष उवाच—

स्वर्याते जनके वीरो राजा दशरथो महान् ।
पृथिवीं पालयामास समृद्धबलवाहनः ॥ १ ॥
उपयेमे स तनयां कोशलाधिपतेर्द्विज ।
कैकयीञ्च ततो भार्यां द्वितीयामप्यविन्दत ॥ २ ॥
मलयाधिपतेः पुत्रीं तृतीयाञ्च सधर्म्मिणीम् ।
सुमित्रां नाम सुश्रोणीं रूपेणाप्सरसां समाम्[1] ॥ ३ ॥
वेदवेदाङ्गविद्राजा धनुर्वेदे च पारगः ।
साहाय्यं स महेन्द्रस्याकरोद्दैवासुरे युधि ॥ ४ ॥
सहासनं महेन्द्रेणाप्यध्युवास महायशाः ।
तमेकदा समामध्ये समासीनं महीपतिम् ॥ ५ ॥
प्रजा विज्ञापयामासुरनावृष्टिं क्षुधार्दिताः ।
तत् श्रुत्वा चिन्तयामास कथमेतदुपस्थितम् ॥ ६ ॥
अथ तत्रागमत् कोऽपि[2] दैवज्ञः परमो यतिः ।
तं पप्रच्छ महाबाहुरनावृष्टेः स कारणम् ॥ ७ ॥
गणयित्वा स तं प्राह राजानं चिन्तयान्वितम् ।
रोहिणी वृषराशिस्ते तत्र सञ्चारमिच्छति ॥ ८ ॥
शनैश्चरो ग्रहो राजन्ननावृष्टिकरः स्वयम् ।
द्वादशाब्दमनावृष्टिर्दुर्भिक्षं च भविष्यति ॥ ९ ॥
न तस्य प्रतिकारोऽस्ति विमृश्य कुरु यद्धितम् ।
तत् श्रुत्वा स महीपालः परमं कोपमादधे ॥ १० ॥

---

1. A. सुश्रोणीं रूपेणाप्सरसां समाः । 2. A. कश्चित् ।

रथं संयोजयामास वाजिभिश्च विहङ्गमैः ।
साहसं परमं कृत्वा ययौ नक्षत्रमण्डलम् ॥ ११ ॥
तत्रापश्यद्राशिचक्रे ग्रहान् सर्वान् महाभुजः ।
रोहिणीं भेत्तुमुद्यन्तं ग्रहराजं शनैश्चरम् ॥
विलोक्य परमः क्रुद्धः शरं धनुषि सन्दधे ॥ १२ ॥
तदालोक्य शनिः क्रुद्धो भ्रुकुटीभीषणाननः ।
निरैक्षत[3] महाबाहुं रोषताम्रेण[4] चक्षुषा ॥ १३ ॥
तेनावलोकितस्तस्य रथो विच्छिन्नबन्धनः ।
उड्डीनः परिदुद्राव योजनानां सहस्रकम् ॥ १४ ॥
पतन्तश्च ततोऽधस्ताद् घूर्णमानं विहायसि ।
ददर्श दूरात्तद्यानं जटायुर्गरुडात्मजः ॥ १५ ॥
त्वरितः स समागत्य सरथं तं महारथम् ।
दधार द्विज पृष्ठेन विस्तृतेन महाखगः ॥
स रथस्तस्य पृष्ठेऽथ क्षणात्स्थिरतरोऽभवत् ॥ १६ ॥
राजा तं प्राह कस्त्वं भो अकारणसखो मम ।
धृतवान् सरथं मां तु निपतन्तं महीतले ॥ १७ ॥
न तत्प्रत्युपकाराय प्राणै रहमपि क्षमम् ।
सखासि परमो मह्यं स्वेनैव त्वं गुणेन वै ॥ १८ ॥
अहं तु वंशे सूर्यस्य जातो 5 दशरथाह्वयः ।
विजेतुमगमं पक्षिन् ग्रहराजं शनैश्चरम् ॥ १९ ॥
दृष्टिमात्रेण तस्याथ रथोऽयं क्षिप्तबन्धनः ।
उड्डीनः पतमानश्च धृत एष त्वया द्विज ॥ २० ॥

जटायुरुवाच —

गरुडस्यात्मजं विद्धि खगं राजन् जटायुषम् ।
सम्पातिरनुजं सर्व्वपक्षिणां प्रवरस्य च ॥ २१ ॥

---

3. B, नैरैक्षित । 4. Emendation. A and C. रोषितास्रेण ; B. रोषतामेण । 5. B राजा ।

दूरादेव भवन्तञ्च6 पतमानं विहायसः ।
दृष्ट्वा मे स्मृतिमारूढो ज्यायान् सम्पातिराशु वै ॥ २२ ॥
स चाहञ्च महावेगावूर्द्ध्वमुत्पतने पुरा ।
पराक्रमं दर्शयन्तावुड्डीनौ व्योममण्डले ॥ २३ ॥
अतिक्रम्य तु मां राजन् सम्पातिः स महाबलः ।
आदित्यमण्डलं प्राप वेगेन पततां वरः ॥ २४ ॥
ततो विवस्वतो राजन् किरणैर्ज्वलनोपमैः7 ।
दग्धपक्षोऽपतत्पक्षी दग्धशैलनिभः क्षणात् ॥ २५ ॥
विघूर्णमानः स व्योम्नि निपतन्मनुजर्षभ ।
न जाने क्व गतोद्यापि मृगये तं वने वने ॥ २६ ॥
तथा निपतमानं त्वां सरथं व्योममण्डलात् ।
धृतवानस्मि तत्सख्यं सुदृढं श्लाघ्यमावयोः ॥ २७ ॥
ततो दशरथो राजा रश्मीन्मन्द्रैरयोजयत् ।
योक्त्राणि सुदृढीकृत्य समाश्वास्य च वाजिनः ।
भूयोऽपि धनुराकृष्य जगाहे व्योममण्डलम् ॥ २८ ॥
शनैश्चरं पुनर्दृष्ट्वा रोहिणीपृष्ठमास्थितम्8 ।
सन्दधे स शरं भूयो ब्रह्मास्त्रं सुदुरासदम् ॥ २९ ॥
शनैश्चरस्तदालोक्य साहसं तस्य भूभुजः9 ।
सन्तुष्टो नृपतिं प्राह धन्योऽसि नृपसत्तम10 ॥ ३० ॥
दृष्टं ते साहसं राजन् महत्तरममानुषम् ।
क एवं साहसं कुर्याद् देवो रक्षोऽथ मानुषः ।
सम्मुखं मे प्रतिष्ठेत मयि सम्भाव्य विक्रमम् ॥३१ ॥
तुष्टोऽस्मि तव राजेन्द्र वरं मानसिकं वृणु ।
किमर्थमयमारम्भस्तव राजर्षिसत्तम ॥ ३२ ॥

---

6. A and C. ०न्तु । 7. B. ०र्ज्वलनाधिकैः । 8. A and C ०मास्थितम ।
9. A. भूपतेः । 10. Emendation. All must read नृपसत्तमः ।

राजोवाच—

यदि तुष्टोऽसि मे देव ग्रहराज महाबल ।
रोहिणीभेदमेतं भो न भवान् कर्त्तुमर्हसि ॥ ३३ ॥
यावद्वराधरा धारा यावत्सन्तीह सिन्धवः ।
वरमेतं वृणे त्वत्तो ग्रहराज रवेः सुत ॥ ३४ ॥
अहं सूर्यस्य देवस्य कुले जातो भवान् सुतः ।
सम्बन्धी त्वं ततो देहि वरमेतं महाग्रह ॥ ३५ ॥
तथास्त्विति च तेनोक्ते महाराजः कृताञ्जलिः ।
तुष्टाव रविपुत्रं तं प्रणतः श्रद्धयान्वितः11 ॥ ३६ ॥

राजोवाच—

शनैश्चर नमस्तुभ्यं महाग्रह महाबल ।
छायापुत्र सुभीमाय नमस्ते त्रिजटाय च ॥ ३७ ॥
कृष्णाङ्गाय नमस्तुभ्यं खड्गाय खविलङ्गिने ।
कोटराक्षाय देवाय नमो भास्करसूनवे ॥ ३८ ॥
यमभ्रात्रे नमस्तुभ्यं कृतान्ताय यमाय च ।
देवासुरमहायुद्धे भीषणाक्षाय ते नमः ॥
सुरारिहन्त्रे शूराय12 ग्रहाणां पतये नमः ॥ ३९ ॥
देवाश्च दनुजाश्चैव मनुजा राक्षसास्तथा ।
न ते दृष्टिपथं गन्तुं क्षमन्ते कुपितस्यवै ॥
रुष्टो हरसि वै राज्यं तुष्टो राज्यं ददासि च ॥ ४० ॥
कृपालुस्त्वं कठोरस्त्वं कुरूपः सौम्यदर्शनः ।
काकोदराय दीर्घाय दीर्घरोम्णे13 नमोऽस्तुते ॥ ४१ ॥
जटाक्षश्मश्रुशरीराय दुर्निरीक्षाय वै नमः ।
शुष्कमांसाय सूक्ष्माय स्थूलाय च नमोनमः ॥ ४२ ॥

---

11. C. •युतः । 12. A. सराव । 13 B. •लोम्ने ।

राज्यं मह्यं जीवनञ्च सुखं राष्ट्राणि च प्रभो ।
त्वदायत्तानि सर्वाणि वृष्टिश्च त्वदधीनजा ॥ ४३ ॥
दुर्भिक्षनाशनस्त्वं हि सुभिक्षस्य विधायकः ।
प्रसन्नो भव मे नित्यं नमस्तुभ्यं नमोनमः ॥ ४४ ॥
इत्येवं स्तुवतस्तस्य राज्ञस्तुष्टः शनैश्चरः ।
उवाच वचनं विप्र लोकानां हितमाचरन् ॥ ४५ ॥
राजंस्त्वया कृतं स्तोत्रं ये पठिष्यन्ति मानवाः ।
न तेषां तु करिष्यामि बाधां काश्चित्कथञ्चन[14] ॥ ४६ ॥
दुर्भिक्षञ्च महाराज सद्यो नाशमवाप्स्यति ।
जनिष्यते सुभिक्षञ्च आयुरारोग्यमेव च ॥ ४७ ॥
स्वस्थस्तु प्रतियाहि त्वं स्वराज्याय नराधिप ।
कीर्त्तिस्तवेयं विततां चिराय भुवि तिष्ठतु ॥ ४८ ॥
इत्यनुज्ञां समासाद्य कृत्वा तञ्च प्रदक्षिणम् ।
आजगाम महाराजः पुराय[15] परमद्युतिः ॥ ४९ ॥
अथ शान्ताभवन्नाम्ना कन्या तस्य महात्मनः ।
तामसौ प्रददौ सख्ये रोमपादाय भूभुजे ।
अनपत्याय धर्मज्ञः स तां कन्यामकल्पयत् ॥ ५० ॥
ददौ स ऋष्यशृङ्गाय तां कन्यां सुमनोहराम् ।
विभाण्डकस्य पुत्राय हरिण्यां योऽभ्यजायत ॥ ५१ ॥

इति श्रीपद्मपुराणे पातालखण्डे सूर्यवंशकथने दशरथविजयो नाम द्वादशोऽध्यायः ॥

---

14. B ०त्कदाचन। 15. C. महाराज स्वाम्पुरीं०।

XIII

वात्स्यायन उवाच—

विभाण्डकस्य तनयो हरिण्यामुदपद्यत ।
कथं नाम धराधार हरिणी काभवत् पुरा ॥ १ ॥
स सुतां रोमपादस्य शान्तामुदवहत् कथम् ।
तन्मे ब्रूहि द्विजिह्वेन्द्र परं कौतूहलं हि तत् ॥ २ ॥

शेषउवाच—

विभाण्डकस्य विप्रर्षेः[1] काश्यपस्य महातपाः ।
ऋष्यशृङ्गो यतो जातो हरिण्यां तत् शृणुष्व मे ॥ ३ ॥
कन्या स्वर्णमुखो नाम भगस्य परमद्युतिः ।
आसीद्रूपगुणौदार्यभूषिता गर्व्वगर्भिता ॥ ४ ॥
हंसयानेन गच्छन्तं ब्रह्माणं जगतां गुरुम् ।
दृष्ट्वा न सम्भ्रमं चक्रे न चकार प्रदक्षिणम् ॥ ५ ॥
ब्रह्मा शशाप क्षुद्रेऽपि तामागसि विलासिनीम्[2] ।
मृगीभूय वने तिष्ठ मुनिं सूय विमोक्ष्यसे[3] ॥ ६ ॥
ततः सा हरिणी भूत्वा बभ्राम गहने वने ।
महाह्रदं समासाद्य काश्यपस्तु विभाण्डकः ॥ ७ ॥
तपस्तेपे चिरं तस्थौ ध्यायन् ब्रह्म सनातनम् ।
अथोर्व्वशी महाभागा तत्र प्राप[4] यदृच्छया ॥ ८ ॥

---

1. B and D ब्रह्मर्षेः । 2. B and D विलासिणीं । 3. A, C and D विमोक्षसे । 4. B प्राप्ता ।

तां विलोक्य प्रचस्कन्द रेतस्तस्य महात्मनः ।
सलिले तत्प्रवाहेन तीरलग्नमभूत्तदा ॥ ९ ॥
सैव स्वर्णमुखी नाम हरिणी तु पिपासिता ।
पपौ तत्र जलं विप्र सहैव मुनिरेतसा ॥ १० ॥
सद्योऽजायत तस्यास्तु कुमारः परमद्युतिः ।
सा तु मुक्ता मृगीदेहाज्जगाहे विबुधालयम् ॥ ११ ॥
विभाण्डकस्तु तं दृष्ट्वा तनयं सूर्यवर्चसम् ।
पालयामास जातेन स्नेहेन द्विजनन्दन ॥ १२ ॥
स चापि5 विपिने तस्मिन्मुनिवीर्यभवो मुनिः ।
पित्रा प्रापितसंस्कारः प्राप्तवेदः समाहितः ॥
व्यचरत्तत्र विपिने जनदर्शनवर्जिते ॥ १३ ॥
तस्य बाल्ये त्वतिक्रान्ते मूर्ध्नि शृङ्गावजायताम् ।
मातृगोत्रं सूचयन्तौ6 ऋष्यशृङ्गस्ततोऽभवत् ॥ १४ ॥
रोमपादस्य राजर्षेर्विषये च महामते ।
ब्राह्मणातिक्रमादेव देववृष्टिर्न चाभवत् 7 ॥ १५ ॥
ततः पुरोहितामात्यानाहूयनृपतिर्द्विज ।
मन्त्रयामास वृष्ट्यर्थमब्रवीत्तं पुरोहितः ॥ १६ ॥
विभाण्डकस्य तनय ऋष्यशृङ्गो महातपाः ।
आगच्छेद्यदि ते राज्यं ततो वृष्टिर्भविष्यति ॥ १७ ॥
तच्छ्रुत्वा रोमपादोऽथ विचिन्त्य मनसा नृपः ।
दूतैनाकारयामास वारमुख्याः सहस्रशः ॥ १८ ॥
ता उवाच वचो राजा विभाण्डकसुतं मुनिम् ॥
समानेष्यति या तस्मै दास्यामि विपुलं धनम् ॥ १९ ॥

---

5. B वापि । 6. Emendation. All mss. सूचयन्ती । 7. L. वृष्टिर्न चाभवत्तदा ; in D missing.

तच्छ्रुत्वा वचनं तस्य वेश्यास्ता भयमाविशन् ।
न पारयामस्तत्कर्म महाराज चमस्व नः ॥ २० ॥
विभाण्डको महातेजाः क्रुद्धो धक्ष्यति चक्षुषा ।
सर्वा न त्वां च राजेन्द्र निवर्तस्व मनोरथात् ॥ २१ ॥
विद्रुतासु ततस्तासु बुद्ध्या कापि धिया वरा ।
वेश्या खनस्त्रिकां प्राह गृहाण नृपतेर्धनम् ॥ २२ ॥
आनयिष्ये मुनेः पुत्रं सहाया त्वं भवेर्मम[8] ।
किं करोमि वयोऽतीतं तेन त्वां प्रार्थयाम्यहम् ।
इत्युक्ता तां समाश्वास्य वेश्या राजानमब्रवीत् ॥ २३ ॥
आनयिष्ये महाराज[9] विभाण्डकसुतं मुनिम् ।
प्रतिजानीहि भवता सान्त्वनीयो विभाण्डकः ॥ २४ ॥
राजाऽब्रवीत् समायाते ऋष्यशृङ्गे यदा मुनिः ।
आगमिष्यति संक्रुद्धः सान्त्वनीयः स मे तदा ॥ २५ ॥
तं तस्य समयं श्रुत्वा वेश्या नावं चकार ह ।
आश्रमं तच्च चक्रे च दिव्यगुल्मलतादिभिः ॥ २६ ॥
सञ्चित्य तत्र वस्तूनि मधुराणि प्रियाणि च ।
सा नावं वाहयामास नियुक्तैरवनीभृता ॥ २७ ॥
आश्रमाच्काश्यपस्याथ सान्तरे योजनत्रयात् ।
तस्थौ नावि वनाभ्याशे[10] सञ्चयित्वा वराङ्गनाः ॥ २८ ॥
कानने च यथा[11] नावि विशेषः स्म न दृश्यते ।
तथा चक्रे योगविज्ञा बुद्ध्या वेश्या धिया वरा ॥ २९ ॥
अथ दूतेन विज्ञाय काश्यपस्य क्रियोचितम् ।
समयं गन्तुकामस्य तपसे चरणाय च ॥ ३० ॥

---

8. C भवेन्मम । 9. C आनयिष्यामि राजेन्द्र । 10. All mss. read वनाभ्यासे, Corrected by L to वनाभ्याशे । 11. Corrected by L to यथा ; All mss तथा ।

प्रेषयामास तां नम्रीं भूषयित्वा विभूषणैः ।
स्वयञ्च दूरतस्तस्थौ प्रेक्षमाणा मनस्विनी ॥ ३१ ॥
नम्री तस्यास्ततो गत्वा मुनेराश्रममण्डलम्12 ।
विभाण्डकेन कृत्यार्थं गच्छता परिवर्जितम् ॥ ३२ ॥
तत्रोपविष्टं वपुषा चारुरूपेण तत्सुतम् ।
ऋष्यशृङ्गं महाभागमपश्यद्वरवर्णिनी13 ॥ ३३ ॥
ऋष्यशृङ्गस्तु धर्मज्ञः पितरं न विना परम् ।
पुमांसं वा स्त्रियं वापि नापश्यद्विपिने पुरा ॥ ३४ ॥
तां तु दृष्ट्वा वरारोहां मेने मुनिकुमारकम् ।
अब्रवीत्स्वागतं ब्रह्मन् कस्त्वं कस्याथ पुत्रकः ॥ ३५ ॥
अत्रोपविश्यतां14 सम्यगभिवाद्योऽसि मे मतः ।
गृह्यतां फलमूलानि कृतातिथ्यो विया15स्यसि ॥ ३६ ॥
साह तं नाभिवाद्योऽस्मि अभिवाद्यो भवान्मम ।
एवमेव व्रतं मह्यं नासनं संश्रये क्वचित् ॥ ३७ ॥
आश्रमो मे नदीतीरे रम्यपुष्पफलान्वितः16 ।
भवन्तंदर्शयिष्यामि तापसानां मनोरमम् ॥ ३८ ॥

ऋष्यशृङ्ग उवाच—

आतिथ्येन विना ब्रह्मन्न गन्तुं त्वमितोऽर्हसि ।
तद्गृहाण फलान्यत्र जलञ्च परिशीतलम् ॥ ३९ ॥
इत्युक्त्वा प्रददौ तस्मै फलानि कतिचित्ततः ।
ऐङ्गुदानि च पक्वानि तथा भल्लातकानि च ॥ ४० ॥

---

12. A ०रानद० ; D ०रानन्द० । 13. C omits 33b. 14. A and C तत्रोपविश्यताम् ; L भवो० । 15. All mss ०तिथ्योऽसि, Corrected by L to ०तिथ्यो वि० । 16. C omits 36b, 37 and 38a.

सा तानि गृह्य पाणिभ्यामोष्ठप्रान्ते समर्प्य च ।
धूत्कृत्य17 विससर्जाथ ददौ भक्ष्याणि कामिनी ।
महारसानि स्वादूनि फलमात्राकृतीनि च ॥ ४१ ॥

वैश्योवाच—

पश्यास्माकमाश्रमस्य फलान्येतानि शाखिनाम् ।
पानीयञ्च मनोहारि नाश्रमस्ते मनोहरः18 ॥ ४२ ॥
ऋष्यशृङ्गस्तु पाणिभ्यां गृहीत्वा मोदकान् द्विज ।
भक्षयामास लोभेन सादराच्च19 पुनः पुनः ॥
पानकं च ततः पीत्वा मधुरं मादकं पुनः20 ॥ ४३ ॥
अनास्वादितपूर्व्वाणि तान्यास्वाद्य द्विजात्मजः ।
मेने परं सखायं तां विश्वस्वास च तापसः ॥ ४४ ॥
सा विस्रब्धं ततो ज्ञात्वा मुनिपुत्रं मनस्विनी ।
भुजाभ्यां गाढमाश्लिष्या पाययत्तं मुखासवम् ॥ ४५ ॥
स्तनाभ्यां च सुवृत्ताभ्यां सा पस्पर्श पुनः पुनः ।
मुग्धोऽभूदृष्यशृङ्गोऽथ परमं प्राप सम्मदम्21 ॥ ४६ ॥
सा तु ज्ञात्वा ततः कालं तापसस्य समागतेः ।
अग्निहोत्रं समुद्दिश्य त्वरिता नावमाययौ ॥ ४७ ॥
ऋष्यशृङ्गस्तदा मुग्धोऽचिन्तयत्तां निरन्तरम् ।
नाग्निकार्यं चकाराथ नाहरच्च समित्कुशान् ।
ग्रहग्रस्त इव ब्रह्मन् व्यलोकत दिशो मुहुः ॥ ४८ ॥
विभाण्डकस्तु तपसो निवृत्त्य द्विजसत्तम ।
आश्रमं यावदायाति पुत्रं मुग्धं व्यलोकयत् ॥ ४९ ॥

17, L खुत्कृत्य ; C फूत्कृत्य । 18 C मनोरमः । 19. A. B. C and D सादरच्च ; Corrected by L to सादराच्च । 20. C omits 43b.

21 A नर्मदम् ।

उवाच च किमेतत्ते वैमनस्यं कुतोऽभवत् ।
समित्पुष्पाणि नाद्यापि वत्स किं नाहृतानि ते ।
अग्निकार्य्यं न सम्यक्तं विच्छलस्त्वं विलोक्यसे ॥ ५० ॥

ऋष्यशृङ्ग उवाच—

अतिथिः कश्चिदायातो रम्यवेशो मनोहरः ।
सुविभक्ता जटा बिभ्रत् सीमन्ते द्विदलीकृताः ॥ ५१ ॥
तस्य वल्कलकः स्निग्धः सुस्पर्शः सुखदोऽति मे ।
मेखला च सुशिञ्जाना शिञ्जाना पादमेखला ॥ ५२ ॥
वक्षसा च दधत् शृङ्गे सुवृत्ते स्पर्शसौख्यदे ।
बिभ्रत् करे च शुभ्राणि वर्त्तुलानि फलानि वै ॥ ५३ ॥
समागत्य नाशनं मे जग्राह नाभिवादनम् ।
अन्वमन्यत मामेव[22] सोऽभिवाद्य[23] स्थितोऽग्रतः ॥ ५४ ।
मया दत्तानि पक्वानि फलानि प्राश्य दूरतः ।
स फलानि ददौ मह्यं स्वादूनि रसवन्ति च ॥ ५५ ॥
जलं ददौ स्वाश्रमस्य तेन मेऽपहृतं मनः ।
किं व्रतं तात तस्य स्म तच्चिकीर्षामि सौख्यदम् ॥ ५६ ॥
विभाण्डकस्तु तच्छ्रुत्वा ज्ञात्वा रक्षःकृतन्तु तत् ।
पुत्रमाह न जानासि रक्षांसि बलवन्ति वै[24] ॥ ५७ ॥
कृत्वा मायामयं रूपं तपोविघ्नं चरन्ति हि ।
सम्भाषा तेषु ते नैव कर्तव्या तप इच्छता ।
अस्माकं तानि भक्ष्याणि तपोहानिकराणि वै[25] ॥ ५८ ॥
इति प्रशस्य तं पुत्रं विमनाः स विभाण्डकः ।
वनं विलोडयामास[26] समन्ताद्योजनद्वयम् ॥ ५९ ॥

---

22. B मामेवं । 23. C. °भिवाद्यं । 24. B. च । 25. B च । 26. D. विलोट्यामास ; corrected by L to विलोकयामास ।

न ददर्श तपोविघ्नकारणं कुत्रचिन्मुनिः ।
परेद्युर्न ययौ तस्युं पुत्रं दृष्ट्वा समाकुलम् ॥ ६० ॥
न ययौ सापि तन्वङ्गी दूतैर्ज्ञात्वा विधेयताम् ।
अन्येद्युरपि नागच्छदन्येद्युरपि तापसः ॥ ६१ ॥
दिनत्रये गते पुत्रं सुखं[27] ज्ञात्वा विभाण्डकः ।
अविघ्नञ्चाश्रमं दृष्ट्वा जगाम तपसे पुनः ॥ ६२ ॥
अथाजगाम तन्वङ्गी सैव[29] दत्तानियोजिता ।
ऋष्यशृङ्गं तथा सन्तं मोहयामास कामिनी ॥ ६३ ॥
उवाच चाश्रमं मह्यं द्रष्टुमिच्छसि यद्भवान् ।
तदागत्यावलोक्यैवागमिष्यसि मया सह ॥ ६४ ॥
इत्युक्त्वा तं मोहयित्वा गाढमालिङ्गनादिभिः ।
नावं निनाय तन्वङ्गी भूषयामास भूषणैः ॥ ६५ ॥
पानकं पाययित्वाथ मादकं मधुना समम् ।
नावं तां वाहयामास वेश्या दत्ता धिया वरा ॥ ६६ ॥
रोमपादपुरे नावं निबध्य नृपमब्रवीत् ।
आगत ऋष्यशृङ्गोऽयं यद्विधेयं विधीयताम् ॥ ६७ ॥
ऋष्यशृङ्गे तु संप्राप्ते वामवस्तद्विया द्विज ।
ववर्ष सलिलं भूरि सुभिक्षमभवत्तदा ॥ ६८ ॥
रोमपादः काश्यपस्य शङ्कमानः समागतिम् ।
शान्तां नाम ततः कन्यां ददौ मुनिसुताय वै ।
ऋष्यशृङ्गाय धर्मज्ञ यथाविधि महामतिः ॥ ६९ ॥
विभाण्डकस्ततोऽभ्येत्य स्वाश्रमं मुनिसत्तमः ।
अदृष्ट्वा तनयं तत्र जातोद्वेगो बभूव ह ॥ ७० ॥

---

27. C. स्वस्थं । 28. D. अवेद्युञ् corrected by L to अविघ्नं । 29. वेश्या corrected by L to वेश्या ।

मृगयामास विपिने समन्ताट्टष्यशृङ्गकम् ।
परिश्रान्तस्ततो ध्यानं चकार तपतां वर:30 ॥ ७१ ॥
ध्यानेनालोकयामास रोमपादविचेष्टितम् ।
क्रुद्ध: प्रायात्ततो विप्र धक्ष्यन् क्रोधाग्निना नृपम् ॥ ७२ ॥
सपत्तनं सहामात्यं सप्रजं सपुरोहितम् ।
अथागत्य पुरप्रान्ते हृत्तमूलमुपाश्रित: ॥ ७३ ॥
वह्निमुत्पादयामास चक्षुर्भ्यां वदनात्तथा31 ।
तत्पुरं दग्धुमारेभे वह्नि32रूर्ध्वशिखो महान् ॥ ७४ ॥
रोमपादस्तदालोक्य ऋष्यशृङ्गं सभार्यकम् ।
प्रेषयामास मतिमान् सान्त्वनाय तपस्विन: ॥ ७५ ॥
ऋष्यशृङ्गस्तु धर्मात्मा सभार्यो मुनिमभ्यगात् ।
अभिवाद्याथ पितरं जगाद मधुरं वच: ॥ ७६ ॥
वधूस्ते राजपुत्रीयमभिवादयते प्रभो ।
तच्छ्रुत्वा काश्यपो वाक्य33 राज्ञ: सम्मानमात्मनि ॥ ७७ ॥
वैवाहिकं च तत्कर्म प्रार्थनीयं मन:स्थितम् ।
सिद्धं मत्वा34 संजहार क्रोधाग्निं तपतां वर: ॥ ७८ ॥
आशीर्भिर्वर्द्धयामास दम्पती काश्यपात्मज: ।35
राजानं च समाश्लिष्य मुमुदे प्रशशंस च ॥ ७९ ॥
ऋष्यशृङ्गं तत: प्राह प्रसन्नात्मा विभाण्डक: ।
पुत्रमुत्पाद्य वत्स त्वमाश्रमाय प्रयास्यसि ॥ ८० ॥

---

30. B. मुनिसत्तम: । 31. A and D. ०त्तत: । 32. C. वह्नि० । 33. D. तच्छ्रुत्वा काश्यपोत्मज: corrected by L to काश्यपात्मज: । 34. B and C. ज्ञात्वा । 35. D omits 82 and 83a.

इत्यादिश्य ततो विप्र ऋष्यशृङ्गं विभाण्डकः ।
जगाम स्वाश्रमं प्रीतस्तपसे कृतनिश्चयः ॥ ८१ ॥
इति ते कथितं विप्र ऋष्यशृङ्गो यथा मुनिः ।
उपयेमे रोमपादात् शान्तां दशरथात्मजाम् ॥ ८२ ॥

॥ इति श्रीपद्मपुराणे पातालखण्डे ऋष्यशृङ्गोपाख्यानं नाम त्रयोदशोऽध्यायः ॥

XIV

शेष उवाच—

राजा दशरथः श्रुत्वा रोमपादेन तां सुताम् ।
प्रदत्तां ऋष्यशृङ्गाय मुमुदे सर्वधर्मवित् ॥ १ ॥
चकार राज्यं सम्पन्नं हृष्टपुष्टजनाकुलम् ।
चिन्तयामास नियतमदृष्टसुत इत्युत ॥ २ ॥
कदाचिन्मृगयां यातः काननं व्यचरद्बली ।
निघ्नन् मृगान् वराहांश्च मेध्यानन्यान् पशून् वने ॥ ३ ॥
हयेन वातवेगेन प्राप्तोऽथ तमसातटम् ।
तत्रान्धस्य मुनेः पुत्रो वैश्यस्य तोयकाङ्क्षिणः ॥ ४ ॥
पूरयामास सलिलं कुम्भे नादोऽभवत्तदा ।
द्विरदस्येव शुश्राव करे पूरयतो जलम् ॥ ५ ॥
निनदन्तं दशरथस्ततो बाणं समोच ह ।
शब्दपाती स बाणस्तु मुनिपुत्रस्य वक्षसि ॥ ६ ॥
अपतच्चापातयच्च तं भूमौ विह्वलस्वरम् ।
हा तात तात तातेति कृत्वा रावं समोह सः ॥ ७ ॥
तदाक्रन्दितमाकर्ण्य राजा दशरथस्त्वरन् ।
अभिगम्य ददर्शाथ पतितं मुनिबालकम् ॥ ८ ॥
विद्धं वक्षसि बाणेन प्लावितं कुम्भवारिणा !
स विशङ्क्य महाबाहुश्चिन्तयित्वा चिरं नृपः ॥ ९ ॥
भावि बुद्ध्वा[3]ङ्कमारोप्य जलेनाचाख्य[4] तन्मुखम् ।
प्राप्तचेतसमालोक्य पप्रच्छ कस्य कोऽसि वा ॥ १० ॥

---

1. B. ०क्रष्ट०। 2. B. ०मित्यदम्। 3. C. प्रविबुद्धा। 4. C. ०ख्याख्य।

स उवाच महाराज तनयोऽहं तपस्यतः ।
सिन्धुर्नाम्ना महाभाग जलमानेतुमागतः5 ॥ ११ ॥
जात्या वैश्यस्य चान्धस्य सभार्य्यस्य वने सतः ।
न जीवामि पुनाराजन् कुरु कार्यमथोत्तरम् ॥ १२ ॥
यथा न शप्तस्ताभ्यां त्वं सद्य एव ज्वलिष्यसि6 ।
मामनुद्भूतशल्यं7 हि प्रापयान्तिकमेतयोः ॥ १३ ॥
स्वापराधं स्वयं गत्वा ताभ्यां सद्यो8 निवेदय ।
तदाकर्ण्य वचस्तस्य सापराधो नरर्षभः ॥ १४ ॥
तथैव प्रापयामास स दम्पत्योरथान्तिकम् ।
जलार्थी त्वन्धकः प्राह वत्स वत्सागतोऽसि किम् ॥ १५ ॥
समर्पय जलं तात कृत्यानि च समाचर ।
इत्यमात्रेडयामास नोचे किञ्चिन्नराधिपः ॥ १६ ॥
शनैः शनैस्ततो गत्वा स्वापराधं ततो नृपः ।
विज्ञापयामास तदा स्खलद्भिर्भृशमक्षरैः ॥ १७ ॥
तौ विलप्य ततो विप्र प्राहतुस्तं महीपतिम् ।
शल्यं निःसारय क्षिप्रं यदि जीवति पुत्रकः ॥ १८ ॥
उद्धार ततः शल्यं तयोर्वाचा नरर्षभः ।
स ममार ततः सद्यः पितरावन्वशोचताम् ॥ १९ ॥
नेत्राम्बुजलमादाय पाणिना वैश्य आत्मवान् ।
राजानमशपद्दुःखी सविशङ्कं पुरःस्थितम् ॥ २० ॥
नाहं9 जीवामि राजेन्द्र सभार्य्योऽग्निं समाश्रये ।
भवांश्च पुत्रशोकेन प्राणांस्त्यक्ष्यति10 दुःखितः ॥ २१ ॥

---

5. B omits 11b. 6. C omits 11, 12 and 13a. 7. A. मामनु द्भूतशल्यं ; B. मामसुद्भूतशल्यं। 8. C. वाद्य। 9. A and C. -नहि। 10. A, B and C •स्यत्यसि ; Emendation.

राजोवाच—

अनुग्रहाय शापो मे तपस्विंस्तव कल्पते ।
अपुत्रस्य यतः पुत्रस्त्वन्निरेव भविष्यति ।
अनुजानीहि किं कार्यं मया कार्यं कृतागसा ॥ २२ ॥
तावाहतुः सभाग्यस्य जनस्यैवं भवेदिति ।
दुःखाय कृत आरम्भः सुखाय परिकल्पते ॥ २३ ॥
प्रतिपादय तन्वे त्वं सभार्यातनयस्य वै ।
विधिवद्वह्निसंस्कारं ततो याहि नरर्षभ ॥ २४ ॥
अजात्मजस्ततश्चक्रे चितां तेषां नराधिपः ।
दम्पती पुत्रमालिङ्ग्य ब्रह्मं विविशतुस्ततः ॥ २५ ॥
राजापि स ततो ब्रह्मंस्तदा हर्षविषादवान् ।
व्यवर्तत वनात्तस्मात् पश्चात्सैन्येन सङ्गतः ॥ २६ ॥
राज्यं प्रशासतस्तस्य महीशस्य महामते ।
वर्षाणामयुतं प्रायात्किञ्चिदूनं सुतार्थिनः ॥ २७ ॥
नोपलेभे सुतं राजा चिन्तया भृशमाकुलः ।
शापञ्चावितथं तस्य स्मरन् वैश्यमुनेर्नृपः ।
अपत्यप्रत्ययं बिभ्रद्राज्यमेव शशास ह ॥ २८ ॥
कदाचिदथ शान्ता स पितरं द्रष्टुमागता ।
स्वभर्तुर्वर्णयामास प्रभावं पितुरग्रतः ॥ २९ ॥
स यदीष्टि[11] महाराज तव सन्ततिसिद्धये ।
विदध्यात्तत्फलं नैवान्यथाभवितुमर्हति ॥ ३० ॥

---

11. B and C. यदिष्टिं ।

श्रुत्वा दशरथो वाक्यं मन्त्रिभिः सह मन्त्रयन् ।
मुनिमानाययामास नृपो जामातरं मुदा ॥ ३१ ॥
स आगत्य महातेजा वशिष्ठादिभिरावृतः ।
राज्ञः सन्ततये तेने पुत्रीयामिष्टिमच्युतः ॥ ३२ ॥

॥ इति श्रीपद्मपुराणे पातालखण्डे दशरथयज्ञारम्भ-
श्चतुर्दशोऽध्यायः ॥

XV

शेष उवाच—

एतस्मिन्नन्तरे विप्र पौलस्त्येन दिवौकसः ।
बाधिताः शरणं जग्मुर्नारायणमनामयम् ॥ १ ॥
क्षीरोदस्य सुरास्तीरे तुष्टुवुर्हरिमच्युतम् ।
प्रादुरासीद्धरिस्तेषामुदयाय दिवौकसाम् ॥ २ ॥
नागभोगसमासीनः कमलालालितोऽङ्घ्रिकः ।
कौस्तुभं वक्षसा बिभ्रन् शङ्खचक्रगदाधरः ॥ ३ ॥
प्रफुल्लेन च पद्मेन राजितैकमहाभुजः ।
तं दृष्ट्वा जलदश्यामं निवीतं पीतवाससा ।
आमूर्ध्नः पादलम्बिन्या भूषितं वनमालया ॥ ४ ॥
किरीटिनं कुण्डलिनं हारकेयूरशोभितम् ।
तुष्टुवुस्तं महेन्द्राद्या मुकुलाङ्कितपाणयः ॥ ५ ॥
विश्व[1]मूर्त्ते नमस्तेऽस्तु महापुरुष पूर्व्वज ।
सर्व्वात्मन् सर्वदृष्टे सर्वकार्य[2] महीयसे ॥ ६ ॥
सूक्ष्माणामपि सूक्ष्माय स्थूलेभ्योऽपि स्थवीयसे ।
रजःसत्त्वतमोहन्त्रे त्रिगुणाय महात्मने ॥ ७ ॥
कृत्वा रूपाण्यनेकानि सृजस्यत्सि[3] च पासि च ।
त्वमेव जगतां धातस्त्रिभिरङ्गीकृतैर्गुणैः ॥ ८ ॥
ध्यायन्ति मुनयः शान्ते ज्योतीरूपं जितेन्द्रियाः ।
त्वामेव परमं ब्रह्म पश्यन्ति च गुणात्यये ॥ ९ ॥

---

1. A विष्णु० । 2. C. ०कर्त्रे । 3. A and B. ०त्सि ।

एवं स्तवं विदधतो हरिराह दिवौकसः ।
जानेऽहं व्यवसायं वो यदर्थं यूयमागताः ॥ १० ॥
रावणो बाधते लोकान् सदेवासुरमानुषान् ।
यात यूयं निरातङ्का वानरेष्वृक्षजातिषु ॥ ११ ॥
अवतारयत क्षिप्रं स्वानंशानवनीतले ।
अहं दाशरथिर्भूत्वा निहनिष्यामि रावणम् ।
इत्युक्त्वान्तर्दधे विष्णुस्त्रिदशाः प्रापुरालयम् ॥ १२ ॥
आहूय च4 ततो ब्रह्मा दुन्दुभिं नाम नामतः ।
शशास गच्छ पृथिवीं देवकार्य्यार्थसिद्धये ॥ १३ ॥
विष्णुर्दाशरथिर्भूत्वा क्षतोद्वाहो भविष्यति ।
यथा स गहनं गच्छेत् भ्रात्रा च सह भार्यया ।
तथा त्वया विधातव्यं दुन्दुभे वचनान्मम ॥ १४ ॥
तस्याज्ञां शिरसाधाय गन्धर्वो दुन्दुभिस्तदा ।
मन्थरा नाम सा भूत्वा कैकेय्या दासिकाभवत् ॥ १५ ॥
शक्रप्रभृतयश्चैव सर्व्वे ते सुरसत्तमाः ।
वानरर्क्षवरस्त्रीषु जनयामासुरात्मजान् ॥ १६ ॥
तेऽभवन् सुमहाप्राणा महामत्ता महाबलाः ।
यथैव पितरस्तेषां यशसा च बलेन च ॥ १७ ॥
भेत्तारो गिरिशृङ्गाणां शालतालशिलायुधाः ।
वज्रसंनिहनाः सर्वे कामवीर्यबलान्विताः ।
सर्वे नागायुतप्राणाः सर्वे युद्धविशारदाः ॥ १८ ॥
एवं जातेषु वीरेषु ऋष्यशृङ्गो महातपाः ।
क्रतुं समापयामास अपयामास वै चरुम् ॥ १९ ॥

---

4. A. पथाहूय ।

विभज्य भोजयामास तिस्रः पत्नीर्नृपस्य वै ।
राजा तानर्चयामास दक्षिणाभिर्मुनीन् द्विज ।
ते तु पुत्रवरं दत्त्वा राज्ञे तुष्टाः प्रतस्थिरे ॥ २० ॥

अथ विष्णुश्चतुर्भागं कृत्वात्मानं जगद्धितः ।
विवेश जठरं तासां हन्तुं रावणमुद्यतम् ॥ २१ ॥
कौशल्याया अभूद्रामस्तनयः परमोज्ज्वलः ।
कैकेय्या भरतो जज्ञे5 सुमित्रासूत लक्ष्मणम् ।
शत्रुघ्नश्च महाभाग लवणान्तकरं सुतम् ॥ २२ ॥
क्रमाद्दधिरे पुत्रा राज्ञस्तस्य महौजसः ।
वेदा इवाभ्यस्यमाना विप्रस्य विजितात्मनः ॥ २३ ॥
रामस्तेषां महासत्त्वो बभूव गुणवत्तमः ।
रूपेण च प्रश्रयेण गुणैरेवममानुषैः ॥ २४ ॥
न तृप्तनयनो राजा दर्शने तस्य सोऽभवत् ।
कौशल्या च महाभागा चक्रं न त्यजते सुतम् ॥ २५ ॥
पौराश्च नियतं तस्मिन्ननुरक्ताः पुनः पुनः ।
गृहादागत्य पश्यन्ति रामं राजीवलोचनम् ॥ २६ ॥
स चिक्रीडेऽथ बाल्येऽपि धनुर्भिः पुष्पनिर्मितैः ।
पौराणां बालकैः सार्द्धं भ्रातृभिश्च महाबलैः ॥ २७ ॥
एकदा पञ्चवर्षीयो6 रामो लक्ष्मण एव च ।
उद्याने हरिणाक्रान्ते चिक्रीडतुररिन्दमौ ॥ २८ ॥
पौष्पेण धनुषाविध्यद्रामस्तत्र मृगान् वने ।
विकटो राक्षसस्तत्र विदधद्धरिणाकृतिम् ।
रामं विहन्तुकामोऽभूज्ज्ञात्वा तं राक्षसान्तकम् ॥ २९ ॥
बाल्य एव हि शक्योऽसौ न शक्यः प्राप्तयौवनः ।
विमृश्येति7 ततोऽभ्यासं तीक्ष्णशृङ्गः समभ्ययात् ॥ ३० ॥

---

5. B and C. कैकय्या भरतो रज्ञे । 6. A. वर्षीयौ । 7. Emendation ; A. विमृश्यति ; B and C. विमृश्येति ।

उत्प्लुत्योत्प्लुत्य रामं तं जिघांसुः स महाबलः ।
शृङ्गाभ्यां क्षुरतीक्ष्णाभ्यामुद्यताभ्यां स्थितः पुरः ॥ ३१ ॥
रामस्तु पुष्पधनुषा सद्यः सज्यी8कृतेन वै ।
तस्य वक्षसि चिक्षेप बाललीलोचितं शरम् ॥ ३२ ॥
शराहतः स पपात दर्शयित्वा निजं वपुः ।
गिरिकूटनिभं दंष्ट्राविकटं कोटराक्षकम् ।
सतोयाम्बुदसङ्काशं पिङ्गकेशं सुदारुणम् ॥ ३३ ॥
सखायः पौरबाला ये रक्षसो वीक्ष्य तां तनुम् ।
भीताः प्रदुदुवुः सर्वे ते श्रुत्वा विहतध्वनिम् ॥ ३४ ॥
विकटाक्षन्तु तद्रक्षो हत्वा रामः प्रतापवान् ।
लक्ष्मणेन सह प्राप्तो9 राजानं सदसि स्थितम् ॥ ३५ ॥
पौरबालास्तदागत्य राजानं जगदुर्वचः ।
राक्षसो निहतोऽनेन रामेण हरिणाकृतिः ।
पौष्पेण धनुषा राजन् बालक्रीडाश्रमेण वै ॥ ३६ ॥
तत् श्रुत्वा विस्मितो राजा गत्वोद्यानमपश्यत ।
पतितं राक्षसं भीमं मन्त्रिभिः सह पौरवैः10 ॥ ३७ ॥
शशङ्के नृपतिर्गाढं राक्षसेभ्यो यतस्ततः ।
न रामं चक्षुषो मार्गात्तदारभ्याकरोदहिः ॥ ३८ ॥
अथ क्रमेण संस्कारान् सुतानामकरोन्नृपः ।
संस्कारान् प्राप्य ते वीरा अधीत्य च गुरोः श्रुतीः ।
धनुर्वेदपरं पारं जग्मुश्च सु11महाबलाः ॥ ३९ ॥

॥ इति श्रीपद्मपुराणे पातालखण्डे श्रीरामचरिते
पञ्चदशोऽध्यायः ॥

---

8. A and C. सज्यी०। 9. A and C. प्राप्तो। 10. A. पौरवैः; B. पौरकैः। 11. C. वै।

XVI

शेष उवाच—

विश्वामित्राश्रमे विप्र मारीचाद्या निशाचराः ।
चक्रुर्बाधां परां नित्यं जघ्नुर्यज्ञांश्च भूरिशः ॥ १ ॥
ततस्ते मुनयः सर्वे विमृश्य[1] कौशिकं जगुः ।
राममानय नाशाय रक्षसां रघुनन्दनम् ॥ २ ॥
कौशिकस्तु ततो गत्वा राजानं प्राह पूजितः ।
रामं प्रेषय यज्ञानां रक्षणार्थं महीपते ॥ ३ ॥
तद्वाक्यगौरवाद्राजा रामं प्रियतमं सुतम् ।
लक्ष्मणेन सह प्रादाद्रक्षसां निधनाय वै ॥ ४ ॥
कौशिकं तौ पुरस्कृत्य ययतुः सुमहाबलौ ।
कौशिको वनमासाद्य तावुभौ रामलक्ष्मणौ ॥ ५ ॥
जयाञ्च विजयाञ्चैव विद्यामध्यापयन्मुनिः ।
राक्षसानां विनाशाय ये विद्ये परमर्क्षमे ॥ ६ ॥
ते लब्ध्वा परमप्रीतौ प्रापतुर्गौतमाश्रमम्[2] ।
अहल्या पतिता यत्र पत्या शप्ता शिलामयी ॥ ७ ॥
सुरेन्द्र[3]स्तां कामरूपी भूत्वा गौतमरूपवान् ।
रमयामास तज्ज्ञात्वा गौतमस्तां शशाप ह ॥ ८ ॥
शिला भव चिरं दुष्टे शक्रो भगमयो भवेत् ।
प्रसादितोऽहल्यया[4] शापान्तमकरोन्मुनिः ॥ ९ ॥

---

1. Emendation. mss. read विमृश्य । 2. A and C. ०माश्रयम् । 3. A पुरेन्द्र० । 4. A and C. प्रसाद० ।

रामाङ्घ्रिरेणुस्पर्शान्तमश्नासोत्तच्च कौशिकः ।
ततो गत्वाह रामं स पश्यामोमां शिलां5 भुवि ॥ १० ॥
त्व6त्पदाम्भोजरजसा मानुषीं कुरु राघव ।
इत्युक्ता कथयामास वृत्तान्तं सर्व्वमादितः ॥ ११ ॥
ततो वायुर्व्ववौ तत्र तस्य रामस्य गच्छतः ।
रज आहृत्य वेगेन तस्या7 मूर्ध्नि न्यपातयत् ॥१२ ॥
उत्तस्थौ च ततोऽहल्या रूपिणी सा पतिव्रता ।
राममाशीर्भिरभ्यर्च्च्य प्रययौ पत्युरन्तिकम् ॥ १३ ॥
ततः प्रयान्तं रामं तं ताडका नाम राक्षसी ।
विवृतं वदनं कृत्वा तौ वीरावत्तुमाययौ ॥ १४ ॥
रामस्तु तां महाघोरां दृष्ट्वा विकटराक्षसीम् ।
सज्यं कृत्वा धनुर्बाणान् मुमुचे ज्वलनोपमान् ॥ १५ ॥
तन्मुखं पूरयामास रामो बाणैर्महाबलः ।
ब्रह्मास्त्रेण ततो जघ्ने तस्या वक्षस्यरिन्दमः ॥ १६ ॥
सा मुमोच ततः प्राणान् राक्षसी घोरविक्रमा ।
ततः प्रतस्थे काकुत्स्थो लक्ष्मणेन समं बली ॥ १७ ॥
कौशिकस्य मुनेस्तस्य पश्चादेव महाबलः ।
यज्ञशालां कौशिकस्य प्रापत् रघुनन्दनौ ॥ १८ ॥
वोचितो8 मुनिपत्नीभिः सस्पृहं दिव्यरूपिणौ ।
रामस्तानाह यज्ञान् वै उपस्थापयत द्विजाः ॥ १९ ॥
जिघांसूनभिपश्यामो राक्षसान् व्योमचारिणः ।
ततस्तेनुर्द्विजाः कर्म वेदध्वनिपुरस्कृतम् ॥ २० ॥
अध्वमाचक्रमे धूमो भिन्नाञ्जनचिभो नभः ।
तद्दृष्ट्वा राक्षसाः क्रुद्धा9 मारीचाद्या महाबलाः ॥ २१ ॥

---

5. A. शिलामिमां । 6. C. तत्पदा० 7. Emendation. mss. तस्य ।
8. A. वीचितं । 9. B. क्रुद्धा ।

भ्रम्रमानशिरो10 विप्र विकटास्योरुकन्धराः ।
दर्शयामास दूरात्तान् विश्वामित्रो रघोः सुतौ ॥ २२ ॥

लक्ष्मणोऽथ समालोक्य राक्षसान् भृशदारुणान् ।
सन्दधे विशिखान् घोरान् रक्षोघ्नान् सुमहाबलः ॥ २३ ॥

विभिन्नगात्राः परिनून11मध्या विकृष्णजङ्घा दलिताङ्घ्रिहस्ताः ।
हताः समन्ताद्रघुनन्दनेन रक्षोगणास्तत्र रणे निपेतुः ॥ २४ ॥

रक्तःशरोरैश्शरणैर्भुजैस्तान् शिरोभिरुद्भूतशिरोरुहैश्च ।
वृक्षैः कबन्धैश्च करैः किरीटैर्वनं समाकीर्णतलं बभूव ॥ २५ ॥

तल्लक्ष्मणेषुप्रतिभिन्नसैन्यं मरीचमेकं प्रधने चरन्तम् ।
रामः शरेणातिमनोजवेन चिक्षेप तोरेऽब्धिनिधेः सुदूरे ॥ २६ ॥

ततो मुनीनां स महेन्द्रकल्पः कृत्वाभिवादं सहलक्ष्मणेन ।
उवाच कर्माणि प्रवर्तयध्वं न भीतिरद्यप्रभृति द्विजानाम् ॥ २७ ॥

ततस्तौ कौशिकः प्राह भ्रातरौ रामलक्ष्मणौ ।
गच्छतं नगरे वत्स जनकस्य महीपतेः ॥ २८ ॥

यज्ञशालां महावीरौ तत्र माहेश्वरं धनुः ।
द्रक्ष्यथः12 सुमहाघोरं सुनाभाहृपणीकृतम् ॥ २९ ॥

तच्छ्रुत्वा कौतुकाविष्टौ तावुभौ रामलक्ष्मणौ ।
जग्मतुर्यज्ञशालां तां विश्वामित्रेण भाषितौ ॥ ३० ॥

जनकस्तु मुनिं दृष्ट्वा पूजयामास शुद्धधीः ।
प्रीतिञ्च परमां लेभे दृष्ट्वा तौ रामलक्ष्मणौ13 ॥ ३१ ॥

कौशिकस्त्वाह जनकमिमौ दशरथात्मजौ ।
धनुरेशं द्रष्टुकामौ महासत्त्वौ महाबलौ ॥ ३२ ॥

---

10. B. °शिरे । 11. Read परिलून ? 12. A and C. द्रक्षतः । 13, C omits 30b and 31.

जनक उवाच—

युवानो राजपुत्राश्च बहवोऽपि समागताः ।
सज्यं कर्तुं न शेकुस्ते धनुरेशं महामुने ॥ ३३ ॥
व्रीड़या परयाविष्टा ययुः केचित् स्थिता अपि ।
बालाविमौ तद्विलोक्य कठोरं किं करिष्यतः 14 ॥ ३४ ॥
महात्मनां कुले जातौ वपुषापि मनोहरौ ।
बालौ दाशरथी वीक्ष्य मनो मे रमते भृशम् ॥ ३५ ॥
अयं नीलाम्बुदश्यामो रामो राजीवलोचनः ॥
मत्तमातङ्गगमनो बलवान् वै भविष्यति ॥ ३६ ॥
वयः प्राप्य महाभाग द्रक्ष्यत्यपि धनुस्त्विदा ।
नाधुनापयशः कर्तुं धनुरेशं हि पश्यतु ॥ ३७ ॥

विश्वामित्र उवाच—

बालमात्रेति नावज्ञामस्मिंस्त्वं कर्तुमर्हसि ।
मुनीनामाश्रमे यज्ञान् रक्षेभ्यो ऽयमरक्षयत् ॥ ३८ ॥
एकेनैव च बाणेन मारीचाख्यो निशाचरः ।
दिगन्तं प्रापितो राजन् मावमंस्था रघूत्तमम् ॥ ३९ ।
तच्छ्रुत्वा वचनं तस्य जनको जनसंमतः15 ।
राघवं दर्शयामास सभायां तन्महद्धनुः ॥ ४० ॥
उवाच च सभामध्ये जनको जनसंमतः ।
शृण्वत्सु राजपुत्रेषु पौरेषु च समन्ततः16 ॥ ४१ ॥
अयोनिजा सुरूपा च सीता नाम सुता मम ।
तत्पाणिग्रहणादेतद्धनुरेशं पणीकृतम् ॥ ४२ ॥
य एतद्धनुराकृष्य वीरः सज्यं करिष्यति ।
तस्यैव भविता भार्या सीता नाम सुता मम ॥ ४३ ॥

---

14. B. करिष्यः । 15 A and C. जनसंमतम् । 16. A omits this line.

नोत्तस्थुः कोऽपि तच्छ्रुत्वा राजपुत्राः सभासदः ।
रामः कौशिकमामन्त्र्य जग्राह धनुरैश्वरम् ॥ ४४ ॥
वामेनैव करेणाथ गृहीत्वा शाम्भवं धनुः ।
शिञ्जिनीं योजयामास नमयन् गजविक्रमः ॥ ४५ ॥
अथ सन्धाय विशिखं स चकर्ष महाबलः ।
आकर्णमूलमाकृष्य तद्धनुः कुण्डलीकृतम् ॥ ४६ ॥
बभञ्ज लीलया रामो गर्वेण सह भूभुजाम् ।
आसीत्कोलाहलो विप्र भग्ने धनुषि शाम्भवे ॥ ४७ ॥
जनकः प्रीतिमगमत् पौराश्च सुमुदुर्भृशम् ।
सीता हर्षं परं प्राप रामं दृष्ट्वा महाबलम् ॥ ४८ ॥
अथ सीर[17]ध्वजो राजा राजानमजनन्दनम् ।
दूतैरानाययामास सपौरजनबान्धवम् ॥ ४९ ॥
सीतां ददौ स रामाय लक्ष्मणाय तथोर्मिलाम् ।
भ्राता कुशध्वजस्तस्य श्रुतकीर्त्तिं ततः सुताम् ।
प्रायच्छद्भरतायाथ शत्रुघ्नाय च माण्डवीम् ॥ ५० ॥
कृतोद्वाहान् कुमारांस्तान् कृतकौतुकमङ्गलान्[18] ।
सभार्य्यान् जनको दृष्टो वर्द्धयामास यौतुकैः ॥ ५१ ॥
यानेषु तान् समारोप्य सभार्य्यांस्तनयान्नृपः ।
स्वपुराभिमुखः प्रायात् हृष्टो दशरथो द्विज[19] ॥ ५२ ॥
माहेश्वर[20]धनुर्भङ्गं श्रुत्वा रामस्तु भार्गवः ।
घोरं कुठारमादाय पथि प्राप[21] रघूत्तमम् ॥ ५३ ॥
तं दृष्ट्वा दूरतो रामं विज्ञाततत्पराक्रमः ॥
राजा दशरथो दूरात्स्वागतं व्याजहार वै ॥ ५४ ॥
भार्गवस्तदनादृत्य क्रोधरक्तान्तलोचनः ।
व्याजहार धनुः केन भग्नं तस्य पिनाकिनः ॥ ५५ ॥

---

17. B. and C. शौर० । 18. C. ०मङ्गलः । 19. C. हृष्टोऽजतनयो द्विज ।
20. A. महेशुर० । 21. A. प्रायत् ।

निःक्षत्रिया कृता पृथ्वी वारानासप्तविंशकान् ।
क्षत्रियस्तु पुनर्जातः कस्तं पश्यामि दुर्मदम् ॥ ५६ ॥
राजाब्रवीच्च ते राम[22] कोपस्य विषयः शिशुः ।
सुत एष मम त्वान्तु प्रणमत्याशिषां पदम्[23] ॥ ५७ ॥
धनुर्भङ्गे कृतः शक्तिं प्राप्नोतु तनयः शिशुः ।
घुणैरुपहतं जीर्णं स्वयमेव बभञ्ज ह ॥ ५८ ॥

परशुराम उवाच—

तिष्ठत्वेतद्वचस्तुभ्यं रामस्ते तनयो बली ।
बभञ्ज सहसा चापं कठोरं शूलपाणिनः ॥ ५९ ॥
धनुषो हि महान् शब्दस्त्रिलोकीं समपूरयत् ।
स रामो मम युद्धेऽभ्यतिष्ठत्वमितविक्रमः[24] ॥ ६० ॥
तच्छ्रुत्वा वचनं तस्य गर्वगर्भं रघूत्तमः[25] ।
उवाच न वयं वीरा ब्राह्मणेषु महामुने ॥ ६१ ॥
रक्ष्याः पूज्याः सदा विप्रा माननीयाश्च भार्गव ।
त्वं तु मां योद्धुमायासि कतमेन नयेन भोः ॥ ६२ ॥
क्षमस्व मम विप्रेन्द्र जानामि त्वं महाबलम् ।
न युक्तं कर्म विप्राणां धर्म्यं क्षत्रस्य तद्भवेत् ॥ ६३ ॥
तपो हि ब्रह्मणां धर्मस्त्वं तपस्वी भव प्रभो ।
शस्त्रधारणमेतद्धि क्षत्रियस्य प्रशस्यते ॥ ६४ ॥

परशुराम[26] उवाच—

राज्ञा प्रोक्तं धनुः क्षुण्णं घुणैर्भग्नं त्वयेति यत् ।
तत्तथैव भवेद्दीर्यं तव पश्यामि साम्प्रतम् ॥ ६५ ॥
मदीयं धनुरेतद्धि गृह्य सज्यं विधीयताम् ।
इत्युक्त्वा सशरं रामो रामाय प्रददौ धनुः ॥ ६६ ॥

---

22. B and C. रामः । 23. A. °शिषास्पदम् । 24. C. °त्वमरविक्रमः । 25. C. रघूद्वहः । 26. C. जामदग्न्य० ।

जग्राह राघवस्तच्च चापं तत्तेजसा सह ।
तेजोहीनस्ततो रामो[27] ब्राह्मणत्वावशेषितः ॥ ६७ ॥
कृताञ्जलिपुटो भूत्वा चमस्खेत्याह राघवम् ।
नाज्ञासिषं[28] भवन्तं हि स्ववीर्यमदमोहितः ।
इदानीं ज्ञातवान् योऽसि[29] चमस्व रघुनन्दन ॥ ६८ ॥
रामस्तमाह बाणोऽयं योजितो धनुषा मम ।
किं करोमि तदाचक्ष्व न वृथा यातु वै शरः ॥ ६९ ॥
भार्गवस्त्वाह बाणेन स्वर्गद्वारं[30] मम प्रभो ।
विरोधय महाभाग न तेऽस्तु विशिखो वृथा ॥ ७० ॥
इत्युक्तो भार्गवेणाथ रामो दशरथात्मजः ।
मुमोच बाणं तस्याथ स्वर्गद्वारं रुरोध ह ॥ ७१ ॥
भार्गवस्तु ततः प्रागान्महेन्द्रं नाम पर्वतम् ।
तत्र तेपे तपः शान्तः शिष्यानध्यापयन् श्रुतीः ॥ ७२ ॥
ततो दशरथो राजा जिते रामे तु भार्गवे ।
परमां प्रीतिमापन्नो ययावुत्तरकोशलाम् ।
हृष्टपुष्टजनाकीर्णां कृतकौतुकमङ्गलाम् ॥ ७३ ॥

॥ इति श्रीपद्मपुराणे पातालखण्डे श्रीरामचरिते[31] सीतापरिणयो नाम षोडशोऽध्यायः ॥

---

27. A and B विप्रो । 28. Corrected by C to न ज्ञातवानसि । 29. Read इदानीं ज्ञातवानसि ? 30. C reads दुर्गद्वारं, but corrects it to स्वर्गद्वारम् । 31. B. omits श्रीरामचरिते ।